M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 203

Title: Shraddha Chandrika

203

Shrāddha Chandrikā	: Title
	: Author
	: Editor
Daka 1739	: Year, Vols.
	: Publisher

203

॥ अथश्राधचंद्रिकाप्रारंभोयंसुहोज्ञेयं ॥ श्रीं ॥ सांब ॥

श्रा॰चं॰ श्रीगणेशाय नमः॥ श्रीकरुणैश्वर्यै नमः॥ जानकीनयनयुग्मगोचरं मानिनां नयनयोरगोचरं॥ नीलमेघरुचिरच्छविं स
दा भावये मनसि राघवं मुदा॥१॥ यत्कीर्त्या धवलीकृतं त्रिभुवनं नाम्ना जगत्पावितं यन्मूर्त्या विनिवारितं बहुतैपा
१ पं महापापिनां॥ यच्छ्रीयैः कठिनं जगाम कृपया तं दुष्यं व्रतादिस्थलेन स्याहं शिरसा नमामि चरणौ श्रीनीलकंठप्रभोः॥२॥
नत्वा सांबं तथा तातं जनयित्रीं गुरूनपि॥ दिवाकरेण विदुषा तन्यते श्राद्धचंद्रिका॥३॥ तत्रादौ श्राद्धप्रशंसा
हेमाद्रौ कौर्मे॥ योनेन विधिना श्राद्धं कुर्याद्विशांतमानसः॥ व्यपेतकल्मषो नित्यं याति नावर्तते पुनः॥ विष्णु
धर्मोत्तरे॥ श्राद्धकाले तथाग्नेना पिंडनिर्वपणं तथा॥ पितॄणां ये करिष्यंति तेषां पुष्टिर्भविष्यति॥ पैतृपैतामह
प्रपितामह पिंडरूपत्वर्थः॥ तत्रैव देवलः॥ देवा यदि पिता जातः शुभकर्मानुयोगतः॥ तस्यान्नममृतं भूत्वा देव
त्वेनानुगच्छति॥ वायुपुराणे॥ देवकार्यादपि सदा पितृकार्यं विशिष्यते॥ देवताभ्यः पितॄणां हि पूर्वमाप्या
यनं शुभमिति॥ अथ श्राद्धलक्षणं माधवीये ब्रह्मांडे॥ देशे काले च पात्रे च श्रद्धया विधिना च यत्॥
पितॄनुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतमिति॥ हेमाद्रौ बृहस्पतिस्मृतावपि॥ संस्कृतं व्यंजनाद्यं १
च पयोदधिघृतान्वितं॥ श्रद्धया दीयते यस्माच्छ्राद्धं तेन निगद्यते इति॥ तत्पंचविधमाहाश्वलाय॰

काम्यं नैमित्तिकं वृद्धिरेकोद्दिष्टं च पार्वणं॥ श्राद्धं पंचविधं प्राहुर्विप्राः [illegible] यास्कोवेदि[illegible] नद्दृति॥ ॥ विश्वामित्रस्तु तस्य द्वा
दशभेदानाह॥ नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिंडनं॥ पार्वणं चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमं॥ क
र्मांगं नवमं प्रोक्तं दैविकं दशमं स्मृतं॥ यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतमिति॥ एषां लक्षणानि भवि
ष्ये॥ अहन्यहनि यच्छ्राद्धं तन्नित्यमिति कीर्तितं॥ वैश्वदेवविहीनं तु अशक्तावुदकेन तु॥ एकोद्दिष्टं तु यच्छ्राद्धं तन्नै
मित्तिकमुच्यते॥ तदप्यदैवं कर्तव्यमयुग्मान्भोजयेद्द्विजान्॥ कामाय विहितं काम्यमभिप्रेतार्थसिद्धये॥ पार्वणेन वि
२ धानेन तदप्युक्तं खगाधिप॥ वृद्धौ यत्क्रियते श्राद्धं वृद्धिश्राद्धं तदुच्यते॥ सर्वं प्रदक्षिणं कार्यं पूर्वाह्णे तूपवीतिना॥ गं
धोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयं॥ अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्॥ ये समाना इति द्वाभ्यामेतज्ज्ञेयं स
पिंडनं॥ नित्येन तुल्यं शेषं स्यादेकोद्दिष्टं स्त्रिया अपि॥ अमावास्यां यत्क्रियते तत्पार्वणमुदाहृतं॥ क्रियते वा
पर्वणि यत्तत्पार्वणमिति स्थितिः॥ गोष्ठ्यां यत्क्रियते श्राद्धं गोष्ठीश्राद्धं तदुच्यते॥ बहूनां विदुषां संपत्सुखार्थं
पितृ[illegible]प्तये॥ क्रियते शुद्धये यत्तु ब्राह्मणानां तु भोजनं॥ शुद्ध्यर्थमिति तत्प्रोक्तं वैनतेय मनीषिभिः॥ निषेक

श्रा·चं· कालेसोमेवसीमंतोऽयनेनतथा ॥ त्रेयंपुंसवनेचैवंश्राद्धंकर्मांगमुच्यते ॥ देवानुद्दिश्ययच्छ्राद्धंतद्दैविकमिहोच्यते ॥ हविष्येणवि
शेषेणसप्तम्यादिषुयत्नतः ॥ गच्छन्देशांतरंयस्तुश्राद्धंकुर्यात्तुसर्पिषा ॥ यात्रार्थमितितत्प्रोक्तंप्रवेशेचनसंशयः ॥ शरीरोप
२ चयेश्राद्धमर्थोपचयएवच ॥ पुष्ट्यर्थमेतद्दिष्टंश्रेयमौपचायिकमुच्यते ॥ वृद्धिःपुत्रजन्मादिः ॥ पर्वणिसंक्रांत्यादौ ॥ निषेक
कालइतिश्रोतस्मार्तौपलक्षणं ॥ देशांतरगमनंतीर्थयात्रारूपं ॥ प्रवेशश्चतत्समनंतरोगृहप्रवेशः ॥ शरीरोपचयेशरी॥ रो
रोपचयहेतुभूतशांत्यादियोगः ॥ निर्णयामृतेकात्यायनप्रयोगः ॥ मृताहेहरहर्दर्शश्राद्धंयच्चमहालये ॥ तन्नित्यमु
त दितंसद्भिर्नित्यवत्तद्विधा×प्र×नेदिति ॥ अथश्राद्धकालः ॥ याज्ञवल्क्यः ॥ अमावास्याष्टकावृद्धिःकृष्णपक्षोऽयनद्वयं ॥
द्रव्यंब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमाः ॥ व्यतीपातोगजच्छायाग्रहणंचंद्रसूर्ययोः ॥ श्राद्धंप्रतिरुचिश्चैवश्राद्धका।
लाःप्रकीर्तिताइति ॥ अत्राष्टकाहेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाइत्याश्वलायनसूत्रोक्ताश्चत
स्रः ॥ पंचमीभाद्रपदस्याष्टमी ॥ तथाचपाद्मे ॥ प्रोष्ठपद्याष्टकाभूयःपितृलोकेभविष्यसि ॥ आयुरारोग्यमैश्व।
र्यंसर्वकामफलप्रदेति ॥ अत्रसप्तम्यादिदिनत्रयेअष्टकाश्राद्धंकार्यं ॥ एतेनमाघ्यावर्षप्रोष्ठपद्याअपरपक्षे च
इत्याश्वलायनोक्तेः ॥ वृद्धिःपुत्रजन्मादिः ॥ कृष्णपक्षःसर्वोपिद्रव्यंश्राद्धयोग्यमन्नादि ॥ ब्राह्मणसंपत्तिःपंक्तिपाव २

नादिवसंपत्तिः ॥ सूर्यसंक्रमइत्येतावतैवसिद्धेःपुनर्विषुवद्ग्रहणंसत्यतिसर्वसंक्रांतिष्वसमर्थोत्रैवश्राद्धंकुर्यादिति ॥ अयनविषुवतोर्लक्षणंहेमाद्रौ
नागरखंडे ॥ मकरेकर्कटेचैवयदाभानुर्व्रजेन्नृप ॥ तदायनाभिधानंश्चविषुवत्तावितिस्थिते ॥ यदास्यान्मेषगोभानुस्तुलांवाथयदाव्रजेत् ॥ तदास्या
व्य द्विषुवास्तुकालश्चाक्षय्यकारकइति ॥ अमावास्यानिर्णीतातिथ्यर्के ॥ तथा ॥ आषाढ्यामथकार्तिक्यांमाघ्यामन्वंतरादिषु ॥ गादिषुचदुस्त यु
भेजन्मर्क्षेग्रहपीडिते ॥ प्रोष्ठपद्यांसितेपक्षेश्राद्धंकुर्वीतयत्नतः ॥ प्रत्यब्दंतुप्रयत्नेनश्राद्धंकुर्यान्नरोनहनीति ॥ युगादयोयुक्तास्तिथ्यर्के ॥ शामालयः।
नवोदकेनवान्नेचगृहप्रच्छादनेतथा ॥ पितरःस्पृहयंत्यन्नमष्टकासुमघासुच ॥ तस्माद्दद्यात्सदायुक्तोविद्वत्सुब्राह्मणेषुचेति ॥ नवोद
केवर्षापक्रमइतिशूलपाणिः ॥ नवोदकंप्रादृविस्यपरे ॥ वस्तुनस्तुतीर्थोदकमित्युक्तं ॥ वचनांतरेकवाक्यत्वात् ॥ नवप्रच्छादनेचनवाग
रसंपादने ॥ आश्वलायनः ॥ अपरेद्युरन्वष्टक्यमिति ॥ ब्राह्मे ॥ मार्गशीर्षेचपौषेचमाघेप्रोष्ठेचफाल्गुने ॥ कृष्णपक्षेचपर्वेद्युरन्वष्टक्यं
तथाष्टकादिति ॥ कात्यायनः ॥ अन्वष्टकासुनवभिःपिंडैःश्राद्धमुदाहृतं ॥ पित्रादिमातृमध्यंचततोमातामहांतकमिति ॥ अष्टका।
न्वष्टकाश्राद्धंनित्यमित्युक्तंहेमाद्रौविष्णुधर्मोत्तरे ॥ अष्टकान्वष्टकाश्चैवस्त्रस्तथैवच न्दपातम ॥ एतानिश्राद्धका। का ४
लानिनित्यान्याहप्रजापतिः ॥ श्राद्धमेतेष्वकुर्वाणोनरकंप्रतिपद्यतइति ॥ तिस्त्रइतिपौषादिमासत्रयाभिप्रायेण ॥ तथा
चहेमाद्रौकौर्मे ॥ अमावास्याष्टकास्तिस्रःपौषमासादिषुत्रिषु ॥ तिस्रश्चान्वष्टकाःपुण्यामाघीपंचदशीतथेति ॥ अयंत्रि
पक्षस्त्वाश्वलायनभिन्नपरः ॥ हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाइत्याश्वलायनोक्तेः ॥ एतदकरणेप्रायश्चित्त

श्रा० मुक्तस्य विधाने॥ एभिर्द्युभिर्जपेन्मंत्रं शतवारं कृत्तद्दिने॥ अन्वष्टक्यं यदा न्यूनं संपूर्णं याति सर्वथेति॥ कर्णेऽभ्युदयज्ञो हेमाद्रावष्टकाप्रकरणे॥
राजानु लभते राज्यमधमेऽश्चोत्तमं धनं॥ क्षीणायुर्लभते वायुः पितृभक्तः सदा नरइति॥ हारितः॥ तीर्थे द्रव्योपपत्तौ च न कालमवधारयेत्॥ पात्रं च ब्रा पे
३ घ: क्षणं प्राप्य स[illegible] श्राद्धं विधीयतइति॥ तीर्थे वेण्यादौ द्रव्योपपत्तावलभ्य श्राद्धीयद्रव्यप्राप्तौ चामावास्यापराह्णादिकालेन प्रतीक्षेतव्यइ.
त्यर्थः॥ अतएव देवीपुराणे॥ अ[illegible]कालेप्यथवाकाले[illegible] तीर्थश्राद्धं सदा नरैः॥ प्राप्तैरेव सदा कार्यं कर्तव्यं पितृतर्पणं॥ पिंडदानं तु तच्छस्त
पितृणां चातिदुर्लभं॥ विलंबो नैव कर्तव्यो नैव विघ्नं समाचरेदिति॥ गजच्छायोक्ता स्कंदपुराणे॥ ॥ यदेंदुः पितृदैवत्ये हंसश्चै
वकरे स्थितः॥ साम्या तिथिर्भवेत्सा हि गजच्छाया प्रकीर्तितेति॥ पितृदैवत्यं मघा॥ हंसो रविः॥ करो हस्तनक्षत्रं साम्या तिथि
त्रयोदशी॥ तथा॥ हंसे हंसस्थिते यातु अमावास्या करान्विता॥ सा ज्ञेया कुंजरच्छाया इति बौधायनोऽब्रवीत्॥ अत्र भो
क्तृदोषो हेमाद्रौ॥ मृतके सूतके चैव ग्रहणे चंद्रसूर्ययोः॥ छायायां कुंजरस्याथ भुक्त्वा तु नारकं व्रजेदिति॥ इति श्राद्धका
लाः॥ अथ श्राद्धदेशा विष्णुधर्मोत्तरे॥ दक्षिणाप्रवणे देशे दक्षिणाग्निसमे भूसंस्कारो गोमयेनोपलेपनादिः॥ प्र
भासखंडे॥ तीर्थादष्टगुणं पुण्यं स्वगृहे ददतः शुभे॥ श्रीमहाभारते॥ तस्य देशाः कुरुक्षेत्रं गयां गंगां सरस्वतीं ३
॥ प्रभासं पुष्करं चेति तेषु श्राद्धं महाफलं॥ [illegible]मिति॥ अथ निषिद्धदेशाः॥ शंखः॥ गोगजाश्वादिपृष्ठेषु कृत्रिमायां तथा

न भुवि॥ न कुर्याच्छ्राद्धमेतेषु पारक्यासु च भूमिषु॥ कृत्रिमायां अट्टालिकायां॥ यमः॥ परकीयप्रदेशेषु पितृणां निर्वपेत्तु यः॥ तद्भूमि
स्वामिपितृभ्यः श्राद्धकर्म विहन्यते॥ स एव॥ रूक्षं क्रिमिहतं क्लिन्नं संकीर्णानिष्टगंधिकं॥ देशं त्वनिष्टशब्दं तु वर्जयेच्छ्राद्धकर्मणी
ति॥ अथ श्राद्धाधिकारिणः॥ सुमंतुः॥ मातुः पितुः प्रकुर्वीत संस्कृतस्त्यौरसः सुतः॥ पैतृमेधिकसंस्कारं मंत्रपूर्वकमाहृतं॥
हेमाद्रौ शंखः॥ पितुः पुत्रेण कर्तव्या पिंडदानोदकक्रिया॥ पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदर इति॥ अत्र पुत्रलक्षणाद्वा
दशविधपुत्रोपलक्षणं ते चोक्ता याज्ञवल्क्येन॥ औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः॥ क्षेत्रजः क्षेत्रजात
स्तु सगोत्रेणेतरेण वा॥ गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः॥ कानीनः कन्यकाजातो मातामहसुतः स्मृतः॥
अक्षतायां क्षतायां वा जातः पौनर्भवस्तथा॥ दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्॥ क्रीतश्च ताभ्यां विक्री
तः कृत्रिमः स्यात्स्वयं कृतः॥ दत्तात्मा तु स्वयंदत्तो गर्भे विन्नः सहोढजः॥ उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः
॥ पिंडदोंऽशहरश्चैषां पूर्वाभावे परः पर इति॥ वस्तुतस्तु इतरेषां कलौ निषिद्धत्वा[illegible]रसदत्तकयोरेव पुत्रपदेना
त्र ग्रहणमिति [illegible] ध्येयं॥ तत्रायं विशेषः पुत्राभावे पौत्रस्य तदभावे प्रपौत्रस्य तदभावे पुनर्दत्तकस्याधिकार इति॥

यादवस्यापि॥ लोकानंत्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैरिति॥ ४२

श्रा॰ चं॰ तथा च विष्णुपुराणे॥ पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसंततिः॥ सपिंडसंततिर्वापि क्रियार्हा नृप जायते॥ एषामभावे सर्वेषां समानोद
कसंततिरिति॥ अन्यत्रापि॥ पुत्रेण लोकाञ्जयति पौत्रेणानंत्यमश्नुते॥ अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपमिति॥ औरसपुत्रस्य
४ त्वनुपनीतस्यापि श्राद्धाधिकारमाह कल्पतरौ मनुः॥ कुर्यादनुपनीतोपि श्राद्धमेको हि यः सुतः॥ पितृयज्ञाहुतिं पाणौ जुहुयाद्ब्रा
ह्मणस्य स इति॥ एको मुख्यः औरस इति यावत्॥ पृथ्वीचंद्रोदये सुमंतुरपि॥ श्राद्धं कुर्यादवश्यं तु प्रमीतपितृको द्वि
जः॥ व्रतस्थो वाव्रतस्थो वाप्येक एव भवेद्यदि॥ अनुपनीतं विवृणोति स एव॥ अनुपनीतोपि कुर्वीत मंत्रवत्पैतृमेधि
कं॥ यद्यसौ कृतचूडः स्याद्यदि स्यात्त्रिवत्सर इति॥ अत्र विशेषणद्वयमपि विवक्षितं॥ विधेयकर्तृ गतत्वात्॥
यत्तु व्याघ्रपादः॥ कृतचूडस्तु कुर्वीत उदकं पिंडमेव च॥ स्वधाकारं प्रयुंजीत वेदोच्चारं न कारयेदिति॥ यच्च स्मृतिसंग्र
हे॥ कृतचूडोनुपेतश्च पित्रोः श्राद्धं समाचरेत्॥ उदाहरेत्स्वधाकारं न तु वेदाक्षराण्यसाविति तत्प्रथमवर्षकृतचूडविषय
मिति॥ माधवमदनरत्नादयो बहवः प्राचः॥ श्रीमातामहा अप्येवं॥ केचित्तु नंदकादिपरोयं निषेधः साहस्त्रमेनोहरं॥
दत्तकादीनामनुपनीतानामेवाधिकारात्॥ तथा च स्कांदे॥ पित्रोरनुपनीतोपि विदध्याद्दौरसः सुतः॥ और्ध्वदे राम
हिकमन्ये तु संस्कृताः श्राद्धकारिण इति॥ प्रथमवर्षकृतचूडस्यापि अग्निदानमात्रं समंत्रं ममंत्रकं॥ असं ४

कं मन्यत्र

संस्कृतेन पत्न्या च त्वग्निदानं समंत्रकं॥ कर्तव्यमिति तत्सर्वं कारयेदन्य एव हीति॥ कात्यायवचनात्॥ अकृतचूडस्याग्निदान मपि न भव
ति॥ पुत्रः स्वोत्पत्तिमात्रेण संस्कुर्यादृणमोचनात्॥ पितरं नाद्धिकाशौ लास्वैत मे धनकर्मणेति सुमंतुवचनादित्युक्तं विस्तरस्त्या॥ र
त्नाकाभावे पत्नी पूर्वोक्तिवाक्यात्॥ अपुत्रा पुत्रवत्पत्नी पुत्रकार्यं समाचरेदित्युक्तेश्च॥ भार्या पिंडं पतिर्दद्यात् भर्त्रे भार्या तथैव
स्म च॥ श्वश्र्वादेश्च स्नुषा चैव तदभावे सपिंडका इति वाक्याच्च॥ मृत्युरपि सपत्नीपुत्रे सति भार्या श्राद्धे नाधिकारः॥ बह्वीनामपि प
त्नीनां एष एव विधिः स्मृतः॥ एका चेत्पुत्रिणी तासां सर्वासां पिंडदस्तु स इति॥ बृहस्पतिवचनात्॥ मदनरत्ने कात्यायने
न तु स्पष्टमेवोक्तं॥ ॥ विदध्याद्दौरसः पुत्रो जनन्या और्ध्वदेहिकं॥ तदभावे सपत्नीजः क्षेत्रजाद्यास्तपोव्रताः॥ तेषामभावे तु
पतिस्तदभावे सपिंडका इति॥ पत्न्यभावे विभक्तस्य सोदरः॥ पूर्वलिखितशंखवचनात्॥ विभक्तस्य दुहिता धनहारित्वात्।
सा तु देवाधिकारी न तत्र तु॥ दुहिता पुत्रवत्कुर्यान्मातापित्रोस्तु संस्कृता॥ आशौचमुदकं पिंडमेकोद्दिष्टं तदा तयोरिति भर
द्वाजोक्तेः॥ तदभावे दौहित्रो धनहारित्वात्॥ तथा च मदनरत्ने स्मृतिसंग्रहे॥ पुत्रः कुर्यात्पितुः श्राद्धं पत्नी च तदसंनिधौ
॥ धनहार्यथ दौहित्रस्तद्भ्राता वाथ तत्सुत इति॥ श्राद्धं मातामहानां तु अवश्यं धनहारिणा॥ दौहित्रेणार्थनिष्कृत्यैक
र्तव्यं पूर्वमुत्तरमिति॥ एतेन पुत्रीकृत एव दौहित्रोधि कारी केषांचिन्मतमपास्तं॥ अथ धनहारिणोपि अधि

श्रा॰चं कारेपरार्के भविष्ये॥ यथा ब्रह्मस्थोपि सुतः पितुः कुर्यात्क्रियां नृप॥ उदकाद्यां महाबाहो दौहित्रोपि तथार्हतीति॥ ततः पिता॥ ततो
५ माता॥ उह्यं नबांधवं प्रेतं भ्राता भ्राताथ वाग्रजः॥ जननी चापि संस्कुर्यान्नहर्दिनोन्यथा भवेदिति॥ सुमंतुः॥ इहाथशब्दादेरमा
वाक्रमोन विवक्षितः॥ बौधायनः॥ पित्रा श्राद्धं न कर्तव्यं पुत्राणां च कथंचन॥ भ्रात्रा चैव न कर्तव्यं भ्रातॄणां च कनीयसा॥ यदि
स्नेहेन कुर्यात्तिं सपिंडीकरणं विना॥ गयायां तु विशेषेण ज्यायानपि समाचरेदिति॥ हेमाद्रिनिर्णये स्मृतिसंग्रहे॥ पत्नी भ्रा
ता च तत्पुत्रः पिता माता स्नुषास्तथा॥ भगिनी भागिनेयश्च सपिंडः सोदरस्तथा॥ असंनिधाने पूर्वेषामुत्तरे पिंडदाः स्मृता इति
स्त्रीशूद्रैः श्राद्धं समंत्रकं कार्यं॥ स्त्रीणाममंत्रकं श्राद्धं तथा शूद्रासुतस्य च॥ प्राक् द्विजाश्च व्रतादेशात्तच्च कुर्युस्तथैव तदिति हे
माद्रिधृतमारीचात्॥ अयमेव विधिः प्रोक्तो शूद्राणां मंत्रवर्जितः॥ अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण गृह्यत इति ब्राह्मोक्तेश्च शूद्र
ते संयुज्यते॥ यत्तु॥ प्राक् द्विजाश्च व्रतादेशादिति तदकृतचूडविषयं॥ शूद्रस्य सदा आमश्राद्धमेव न पक्वान्नश्राद्धं॥ सदा चैव
तु शूद्राणां आमश्राद्धं विधीयत इति सुमंतूक्तेः॥ पृथ्वीचंद्रोदये विशेषमाह वृद्धपराशरः॥ आमान्नेन तु शूद्रस्य तच्छांतु द्विज
पूजनं॥ कृत्वा श्राद्धं तु निर्वाप्य सजातीन्नाशयेदथेति दिक्॥ ॥इति भारद्वाजमहादेवभट्टात्मजदिवाकरविरचितश्रा
द्धचंद्रिकायां प्रकारोधिकारीनिर्णयः॥ ॥अथ श्राद्धयोग्या ब्राह्मणाः॥ ॥तत्रादौ ब्राह्मणप्रशंसा हेमाद्रौ भविष्यपुराणादौ॥
ब्राह्मणदेवतं भूमौ ब्राह्मणा दिवि देवताः॥ ब्राह्मणेभ्यः परं नास्ति भूतं किंचिज्जगत्त्रये॥ येषां प्रसादात्सुत्तम मायुर्ध ५

य

र्मः सुखं धनं॥ श्रीर्यशः स्वर्गवासश्च तान्विप्रानर्चयेद्बुधः॥ मनुः॥ वेदविद्याव्रतस्नातान्श्रोत्रियान्गृहमेधिनः॥ पूजयेद्धव्यकव्येन विप
स रीतांस्तु वर्जयेत्॥ गृहमेधिनो गृहस्थाः॥ श्रोत्रियलक्षणं ब्रह्मवैवर्ते॥ जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते॥ विद्यया चापि विप्रत्वं त्रिभिः या
श्रोत्रिय उच्यते॥ तिसरव॥ यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगं॥ शाखांतगमथाध्वर्युं छंदोगं वा समाप्तिगं॥ येषामन्यतमो यस्य
भुंजीत श्राद्धमर्चितः॥ पितॄणां तृप्तिस्तस्य स्याच्छाश्वती साप्तपौरुषीति॥ कौर्मे॥ असमानप्रवरको ह्यसगोत्रस्तथैव च॥ असंबंधी
च विज्ञेयो ब्राह्मणः श्राद्धसिद्धये॥ नारदे॥ श्राद्धेषु विनियोज्यास्ते ब्राह्मणा ब्रह्मवित्तमाः॥ योयोनियोगमंत्रार्थेवासिसंबंध
वर्जितः॥ शातातपः॥ भोजयेद्यथ्यथर्वाणं दैवे पित्र्ये च कर्मणि॥ अनंतमक्षयं चैव फलं तस्येति वै श्रुतिः॥ ब्रह्मवैवर्ते॥ विप्रान्गृहस्था
न्वेदार्थवेदो निरभिमानिनः॥ पत्नीपुत्रसमायुक्तान्श्राद्धकर्मणि योजयेदिति॥ ॥अथ मध्यमाः॥ ॥हेमाद्रौ गार्ग्यः॥
नैकगोत्रेह विदध्याद्यथाकन्या तथाहविः॥ अभावे त्वन्यगोत्राणामेकगोत्रांस्तु भोजयेत्॥ असमप्रवराभावे समानप्रवरान
पि॥ मनुः॥ मातामहं मातुलं च स्वस्त्रीयं श्वशुरं गुरुं॥ दौहित्रं विट्पतिं बंधुमृत्विग्याज्यांस्तु भोजयेत्॥ मात्स्ये॥ भोज
जयेच्चापि दौहित्रं पत्नीतः श्वशुरं गुरुं॥ विट्पतिं मातुलं बंधुमृत्विजाचार्यशालकान्॥ विट्पतिर्जामातेति हेमा
द्रिः॥ अतिथिरिति मेधातिथिमाधवौ॥ बंधुरत्र मातुलपुत्रः॥ एवं पित्रोरपि॥ गौतमः॥ शिष्यांश्चैके सगोत्रांश्च

श्रा॰ च भोजयेदूर्ध्वं त्रिभ्यो गुणवत्तः ॥ देवलः ॥ अज्ञातीनसमानर्षानयुग्मानभ्यगर्हितः ॥ भोजयेदिति शेषः ॥ अत्रिः ॥ पिता पितामहो भ्राता पुत्रो वाथ
६ सपिंडकः ॥ न परस्परं महार्हास्युर्न श्राद्धे ऋत्विजस्तथा ॥ ऋत्विक्पुत्रादयो ह्येते सकुल्या ब्राह्मणाः स्मृताः ॥ वैश्वदेवे नियोक्तव्या यद्येते गुणवत्तरा
इति ॥ ॥अथ निषिद्धाः॥ ॥वायुपुराणे॥ ॥न भोजयेदेकगोत्रान्समानप्रवरांस्तथेति ॥ मनुः ॥ न मित्रं भोजयेच्छ्राद्धे धनैः का
र्योस्य संग्रहः ॥ नारिं न मित्रं यं विद्यात्तं श्राद्धे निमंत्रयेत् ॥ जातूकर्ण्यः ॥ पितृपुत्रौ भ्रातरौ द्वौ निरग्निं गुर्विणीपतिं ॥ सगोत्रप्रवरं चैव श्राद्धेषु परि
वर्जयेत् ॥ मरीचिः ॥ अविद्धकर्णः कुष्ठी च लंबकर्णस्तथैव च ॥ वर्जनीयाः प्रयत्नेन ब्राह्मणाः श्राद्धकर्मणीति ॥ लंबकर्णलक्षणमाह गोभि
लः ॥ हनुमूलादधः कर्णौ लंबौ तु परिकीर्तितौ ॥ अंगुल्यो न्यूनगौरास्तौ तेन शातातपोब्रवीत् ॥ ब्राह्मे ॥ भोक्तुं श्राद्धे च नार्हंति दैवापहतचेतसः
॥ षंढो म्लेच्छश्च कुनखी खल्वाटो दंतरोगवान् ॥ श्यावदंतः पूतिनासः छिन्नांगश्चाधिकांगुलिः ॥ गलरोगो ... गंडमान्यस्तु ... ज्वरः ॥
खंजान्नूपुरमंटाश्च ये चान्ये दीनरूपिणः ॥ खल्वाटः केशरहितः ॥ पूतिनासो क्षिरोगी ॥ गडुमान्कुब्जः खंजः कुंठः ॥ नूपुरो यो श्मश्रुरहितः
॥ स्कांदे ॥ प्राणाः कुंठादयस्य पंक्तय ॥ एतान्विवर्जयेत्प्राज्ञः श्राद्धेषु श्रोत्रियानपीति ॥ नंदिपुराणे ॥ ब्राह्मज्ञानोपदेशे न ... भ
हत्या सर्वकर्मस्तु वर्ज्यास्ते चंडालादिरूपिणः ॥ कालिकापुराणे ॥ अनाश्रमी तु यो विप्रो जटी मुंडो वृथा च यः ॥ वृथाकाषायधा
रीयः श्राद्धे तं दूरतस्त्यजेत् ॥ सौरपुराणे ॥ अंगवंगकलिंगांश्च सौराष्ट्रान्गुर्जरांस्तथा ॥ अभीरान्कुंकुणांश्चैव द्राविडान्दक्षि ६
णापथान् ॥ अवंतिसान्मागधांश्चैव ब्राह्मणांस्तु विवर्जयेत् ॥ क्वचित्प्रतिप्रसवमाह मनुः ॥ न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्मवित् ॥

पतनं शार्कराग्निवितं ॥ मांसं प्रीणाति वै सर्वान्पितॄन्नित्यब्रवीद्द्विजः ॥ तु मंतुरपि ॥ पयो दधि ×६

पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः ॥ ब्रह्मपुराणे ॥ तीर्थेषु ब्राह्मणं नैव परीक्षेत कदाचन ॥ अन्नार्थिनमनुप्राप्तं भोजयेन्मनुरब्रवीत् ॥
विष्णुधर्मोत्तरे ॥ अन्नदानेन कर्तव्यं पात्रावेक्षणमण्वपि ॥ अन्नं सर्वत्र दातव्यं धर्मकामेन वै द्विजः ॥ परीक्षाप्रकारो मनुस्मृतौ ॥ शीलं संवस
नाज्ज्ञेयं शौचं संव्यवहारतः ॥ प्रज्ञा संकथनाज्ज्ञेया त्रिभिर्विप्रं परीक्षयेदिति दिक् ॥ ॥अथ श्राद्धे ग्राह्य पदार्थाः ॥ ॥यमः ॥ समूलस्तु भवेद्दर्भः
पितॄणां श्राद्धकर्मणि ॥ मूलेन लोकाञ्जयति शक्रस्य तु महात्मन इति ॥ ब्रह्मपुराणे ॥ हरिताश्च सपिंजूलाः स्निग्धाः पुष्टाः समाहिताः ॥ गोकर्ण
मात्रास्तु कुशाः सकृच्छिन्नाः समूलकाः ॥ सपिंजूला अपृथक्कृतदलाः ॥ समाहिता निर्दोषाः ॥ गोकर्णमात्रा अंगुष्ठानामिका विस्तारदीर्घाः ॥
दर्भसंग्रहकालस्तु प्रदर्शितस्तिथ्यर्के ॥ हेमाद्रौ पाद्मे ॥ अन्नं च सद्(?)... घृतं चैव गवां श्राद्धेषु पावनं ॥ महिषीणां घृतं प्राहुः श्रेष्ठं न तु पयः क्वचित् ॥ भागवतपुराणे ॥
सर्वेषामेव चान्नानां परमान्नं च पायसं ॥ सर्वानंदः स तु प्रोक्तो येन दत्तं तु पायसं ॥ सौरपुराणे ॥ विविधं पायसं दद्याद्द्रव्याणि विविधानि चेति ॥ प्रचेताः ॥
कृष्णमाषास्तिलाश्चैव श्रेष्ठाः स्युर्यवशालयः ॥ महायवा व्रीहियवास्तथैव ... मधूलिकाः ॥ कृष्णाः श्वेताश्च लोहाश्च ग्राह्याः स्युः श्राद्धकर्मणि ॥ मधूलिका याव
नालादिर्हेमाद्रिः ॥ अत्रिः ॥ तैलपक्वं नरहितं माषमुद्गविवर्जितं ॥ अगोधूममचयच्छाद्धं कृतमप्यकृतं भवेत् ॥ ब्राह्मे ॥ यवव्रीहितिलैर्माषैर्गोधूमैश्चणकैस्तथा ॥
संतर्पयेत्पितॄन्मुद्गैः श्यामाकैः सर्षपद्रवैः ॥ नीवारैर्हरिश्यामाकैः प्रियंगुभिरथार्चयेत् ॥ प्रियंगुः कंगुः ॥ सर्षपा गौरसर्षपाः ॥ मार्कंडेयः ॥ गोधूमैरिक्षुभिर्मु
द्गैः सतीनैश्चणकैरपि ॥ श्राद्धे प्रदत्तैः प्रीयंते मासमेकं पितामहाः ॥ सतीनैः कलायैः ॥ वायुपुराणे ॥ भक्ष्याश्चैव कुरंभं बदरं कांचनपूरिकाः ॥ सेवेर मधुरस
पिंड्यपयः पायसमेव च ॥ स्निग्धमुष्णं च यो दद्यादग्निष्टोमफलं लभेत् ॥ मदनरसं कोमं ॥ कालशाकं च वास्तूकं मूलकं कृष्णमालिका ॥ प्रशस्तानि निषेधः
आदित्यपुराणे ॥ मधुकं रामठं चैव कर्पूरं म... रिचं गुडं ॥ श्राद्धकर्मणि शस्तानि सैंधवं त्रपुसं तथा ॥ रामठं हिंगु ॥ त्रपुसं आम्लदधि ॥ वायुपुराणे ॥
कालशाकं महाशाकं द्रोणशाकं तथार्द्रकं ॥ बिल्वामलकमृद्वीका पनसाम्रातदाडिमं ॥ चव्यं पालेवताक्षोटखर्जूरं च कसेरुकं ॥ कोविदारश्च कं

श्रा॰चं॰ दश्वपटोलंबृहतीफ[illegible]लं॥ पिप्पलीमरिचंचैवएलाशुंठीचसैंधवं॥ शर्करागुडकर्पूरखदरीद्रोण्पत्रकमिति॥ कार्ष्णा[illegible]जिनिः॥ यदि पंजीवितश्चासीत्तदद्यात्तस्यय
७ त्नतः॥ सुस्त्रोदुस्तरंमार्गंततोयातिनसंशयः॥ ॥अथवर्ज्यपदार्थाः॥ ॥वायुपुराणे॥ अकृताग्रयणंधान्यं जातंवेपरिपाटलाः॥ राजमाषानणूंश्चैवमसुरां
श्चविवर्जयेत्॥ अणुव्रीहिभेदः॥ व्रीहिभेदस्त्वणुःपुमानितिकोशात्॥ भरद्वाजः॥ सुद्गाढकीमाषवर्ज्यं द्विदलानिदद्यादिति॥ मुद्गावनमुद्गाः॥ आढकीतुवरी॥ मा
षाः राजमाषाः॥ षट्त्रिंशन्मते यावनालान्कुलिशांश्चवर्जयंतिविपश्चितः॥ यावनालाः जोधकाइतिहेमाद्रिः॥ भरद्वाजः॥ नक्तोष्यनंतु यत्तोयंपल्वलांबुत
थैवच॥ स्वल्पंतुकूश्मांडफलंवजकंदश्चपिप्पली॥ ब्रह्मपुराणे॥ हिंगुग्रगंधापनसंभूनिंबंनिंबराजिके॥ कुस्तुंबुरकलिंगोत्थंवर्जयेदत्पवेतसं॥ राजि
का भाषयाराईदस्युच्यते॥ अत्रहिंगुनोविहितप्रतिषिद्धत्वाद्विकल्पः॥ प्रांचस्तुनिषेधनचनंश्वेतहिंगुनिषेधकमित्याहुः॥ चतुर्विंशतिमते॥ कृष्ण
पे धान्यानिसर्वाणिवर्जयेच्छ्राद्धकर्मणि॥ नवर्ज्यंतिलांश्चैवमुद्गमाषांस्तथैवच॥ मार्कंडेयपुराणे ॥लशुनंगृंजनंचैवपलांडुंपिंडमूलकं॥ करंयानि
चान्यानिहीनानिरसवर्णतः॥ गंधारिकामलाबूंनिलवणान्यूखराणिच॥ श्राद्धकर्मण्यदेयानियाश्चनार्योरजस्वलाः॥ वायुपुराणे॥ अवेद्योक्ता
श्चनिर्यासालवणान्यूखराणिच॥ वर्जयेत्तानिवैश्राद्धेयच्चवाचानशस्यते॥ रजस्वलास्त्रिदिनोत्तरमनिवृत्तरजसः॥ मनुः॥ कुक्कुटोविड्वराह
श्चकाकश्चापिविशालकः॥ वृषलीपतिश्चवृषलः षंढोनारीरजस्वला॥ एतानिश्राद्धकालेतुपरिवर्ज्यानिनित्यशः॥ कुक्कुटः पातेनहंतिश्राद्ध पक्षे
मसंवृतं॥ घ्राणेनविड्वराहश्चवायसश्चरुतेनतु॥ श्वालदृष्टिपातेनमार्जारश्रवणेनतु॥ वृषलीपतिश्चदानेनचक्षुर्भ्यांवृषलस्तथा॥ छाययारा
तिवषंढः स्पर्शेनतुरजस्वलेति॥ कूर्मपुराणे ॥आ[illegible]ढकीकोविदारांश्चपालंक्यमरिचंतथा॥ वर्जयेत्सर्वयत्नेनश्राद्धकालेद्विजोत्तमः॥ राम्
कोविदारः कंचनारः॥ मरीचाद्यादिद्रव्याणिस्वतंत्रशाकतयाप्राप्तानिनिषिध्यंते॥ नतुसंस्कारद्रव्यत्वेनेतिहेमाद्रिः॥ ॥अथपित ७

नि२

पूजाद्रव्याणि॥ ॥हेमाद्रौभगवतीपुराणे॥ ॥यक्षकर्दमेनशुद्धेनसुश्लक्ष्णेनसुगंधिना॥ अभिलिंपन्तिवैविप्रान्सकदाचिन्नतप्यते॥ तेनैवा
गरुमिश्रेणपरंसौभाग्यमश्नुते॥ अरोगश्चविलेपेनभुंक्ते भोगाननुत्तमान्॥ योयक्षकर्दमंदत्तेश्राद्धेषुश्रद्धयान्वितः॥ सभूपतित्वमासाद्यमहे
द्रवन्मोदते॥ यक्षकर्दमलक्षणंविष्णुधर्मोत्तरे॥ कर्पूरागरुकंकोलदर्पकुंकुमचंदनैः॥ यक्षकर्दमइत्युक्तोगंधः स्वर्गेपिदुर्लभइति॥ कंको
लोमरीचिकं कोलापरनामकंसुगंधद्रव्यं॥ दर्पः कस्तूरिका॥ मार्कंडेयः ॥चंदनागरुकर्पूरकुंकुमानिप्रदापयेत्॥ अश्वमेधमवाप्नो ५५
पितॄणामनुलेपनैः॥ पाद्मे ॥पद्मबिल्वार्कधत्तूरपारिभद्राटरूषकाः॥ नदेयाः पितृकार्येषुपयश्चैवाविकंतथेति॥ पारिभद्रोमंदारः॥
सायणीये॥ तुलसीशतपत्रंचभृंगिराजंतथैवच॥ मरुकंमल्लिकांचैवपितॄणामक्षयंभवेदिति॥ ॥स्मृति[illegible]॥ ॥अगस्त्यभृंगराजं
चतुलसीशतपत्रिका॥ चंपकंतिलपुष्पंचषडेतेपितृवल्लभाः॥ शंखः ॥उग्रगंधीन्यगंधीनिचैत्यवृक्षोद्भवानितु॥ पुष्पाणिवर्ज्यानी
निरक्तवर्णानियानि[illegible]च॥ जलोद्भवानिदेयानिरक्तान्यपिविशेषतइतिचैत्यवृक्षः श्मशानवृक्षः॥ ॥अथधूपदीपौविष्णुधर्मोत्तरे॥
धूपोगुग्गुलजोदेयः तथाचंदनसारजः॥ अगरुश्चैवकर्पूरतुरुष्कस्तथैवच॥ ॥शातातपः॥ ॥हस्तवाताहृतंधूपंयेपिबंतिद्विजोत्तमाः
॥वृथाभवतितच्छ्राद्धंतस्मात्तंपरिवर्जयेत्॥ इति॥ ॥शंखः॥ ॥घृतेनदीपोदातव्यस्तिलतैलेनवापुनरिति॥ ॥अथभोजनपात्राणि॥ ॥
वायुपुराणे॥ ॥पात्रंवैतैजसंदद्यान्मनोज्ञंश्राद्धभोजने॥ राजतंकांचनंचैवदद्याच्छ्राद्धेषुयः पुमान्॥ दत्तासत्लभतेदानाप्राकाम्यं
धनमेवचेति॥ ॥हेमाभावेहारितः॥ ॥राजतकांस्यपात्रताम्रपात्राणिकार्याणि॥ यदापर्णपात्रंभोजनेतदापलाशमेवस्याद्धे
मा॥ नमन्मयानिकुर्वीतभोजनेदेवपित्र्ययोः॥ पलाशेभ्योविनानस्युःपर्णपात्राणिभोजने॥ बोपदेवस्तुस्मृतिसंग्रहेउदाजहार॥ ॥

णा

श्रा०चं श्राद्धे पलाशपत्राणि मधूकोदुंबराणि च ॥ पारिकाकुटकप्लक्षकं चानिक्रमाजगुः ॥ कदली चूतपनसजंबुपुंनागचंपकाः ॥ अलाभे मुख्य
८ पत्राणां ग्राह्याण्युः पितृकर्मणीति ॥ ॥ तत्र कदलीपत्रं तु नैव ग्राह्यं ॥ ॥ न जातिकुसुमानि दद्यान्न कदलीपत्रमित्यंगिरोवचनात् ॥ अतु
रापाकुले जातारं माप्यपूर्वपरिग्रहे ॥ तस्यादर्शनमात्रेण निराशाः पितरो गताः ॥ इति क्रतुवाक्याच्च ॥ अक्षतागोपशुश्चैव श्राद्धे मांसं तथा मधु ॥ देवराच्च सु
तोत्पत्तिः कलौ पंच विवर्जयेत् ॥ निगमवाक्येन कलियुगे मांसमधुनोः श्राद्धनिषेधात्तद्विचारो न प्रदर्शितः ॥ नि संक्षेपः ॥ ग्रंथविस्तृतिभया
द्बहुनोक्तं सार एव लिखितः प्रदर्शितः ॥ प्रायशो बहुरुचिर्विपश्चितां विस्तरे भवति सारभागिनां ॥ ॥ अथ विश्वेदेवव्यवस्था ॥ ॥ हेमाद्रावा
दित्यपुराणे ॥ ॥ विश्वेदेवौ क्रतुर्दक्षः सर्वास्विष्टिषु कीर्तितौ ॥ नित्यं नांदीमुखे श्राद्धे वसुसत्यौ च पैतृके ॥ नवान्न[illegible]लंभने देवौ कामका
लौ सदैव हि ॥ अपि कन्यागते सूर्ये काम्ये तु धुरिलोचनौ ॥ पुरूरवार्द्रवौ चैव विश्वेदेवौ तु पार्वणे इति ॥ इष्टिश्राद्धमाधानसोमयागादौ
क्रियमाणं वृद्धिश्राद्धं ॥ नांदीमुखं गर्भाधानादिषु क्रियमाणं वृद्धिश्राद्धं ॥ काम्यं तु पुत्रादिफलोद्देशेन क्रियमाणं ॥ पार्वणममावास्यकं तु
ध्या क्रियमाणं दर्शादिश्राद्धं ॥ सर्वास्विष्टिषु सर्वेषु कर्मांगश्राद्धेष्विति ॥ हेमाद्रिः ॥ ॥ शंखः ॥ इष्टिश्राद्धे क्रतुर्दक्षावष्टम्यां कामकालका
विति ॥ अष्टम्यामष्टकाश्राद्धे कचिद्विश्वेदेवापवादमाह ॥ ॥ तत्रैव शातातपः ॥ नित्यश्राद्धमदेवं स्यादेकोद्दिष्टं तथैव च ॥ मातृश्राद्धं च
युग्मैः स्याद्दैवं प्राग्भु[illegible]रेव पृथक् ॥ योऽयं दैवपूर्वाणि श्राद्धान्यन्यानि यत्नत इति ॥ हेमाद्रिर्नांदीश्राद्ध भिन्नप्रयोगपक्षे मातृश्राद्धमदै ८
वमित्यर्थः ॥ आभ्युदयिकश्राद्धं केचिन्मते दैवहीनमित्याह मार्कंडेयः ॥ आभ्युदयिकं प्रकृत्य ॥ वैश्वदेवविहीनं तु केचिदिच्छंति मानवाः ॥

युग्मा श्वात्र द्विजाः कार्या नैपूज्याश्च प्रदक्षिणमिति ॥ ॥ अथ संक्षेपेणोपयुक्त श्राद्धपरिभाषा ॥ ॥ हेमाद्रौ शातातपः ॥ जपे होमे तथा दाने
स्वाध्याये पितृकर्मणि ॥ अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैः ॥ अत्रिः ॥ उभाभ्यामेव पाणिभ्यां विप्रैर्दर्भपवित्रके ॥ धारणीये प्रयत्नेन ब्रह्मग्रंथिसमन्वि
ते ॥ ॥ मार्कंडेयः ॥ सपवित्रेण हस्तेन कुर्यादाचमनक्रियां ॥ नोच्छिष्टं तत्पवित्रं तु भुक्तोच्छिष्टं तु वर्जयेत् ॥ ॥ अंगुलिनियमः स्मृत्यंतरे ॥ ॥ अनामि
काभ्यामेवैतत्पवित्रं ग्रंथिसंयुतं ॥ धारयेद्दक्षिणेनैव पाणिना वा कुशाग्रहः ॥ ॥ पवित्रदर्भसंख्या मार्कंडेयपुराणे ॥ ॥ चतुर्भिर्दर्भपिंजूलैर्ब्रा
ह्मणस्य पवित्रकं ॥ एकैकन्यूनमुद्दिष्टं वर्णे वर्णे तथाक्रमं ॥ सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रंथितं नवेति ॥ तस्मात्पवित्रं मंत्राभ्यां धारयेदभि
मंत्र्य च ॥ पवित्रवंत इत्यादि मंत्रद्वितयमस्यास्तिति ॥ ॥ अथ ब्राह्मणनिमंत्रणं हेमाद्रौ प्रचेतसस्मृतौ ॥ ॥ कृतापसव्यः पूर्वेद्युः पितृपूर्वं नि
मंत्रयेत् ॥ भवद्भिः पितृकार्यं नः संपाद्यं नः प्रसीदत ॥ सव्येन वैश्वदेवार्थं प्रणिपत्य निमंत्रयेत् ॥ ॥ निमंत्रणप्रकारो नागरखंडे ॥ ॥ ब्रा
ह्मणानां गृहं गत्वा तान्प्रार्थ्य विनयान्वितः ॥ अमुकस्य तथा श्राद्धे क्षणो वै क्रियतामिति ॥ वदेदभ्युपगच्छेयुर्विप्राश्चैवं तथेति चेति ॥ अप
यो पिव्याहरेत्कर्तातं प्राप्नोतु भवानिति ॥ द्विजस्तु प्राप्नवानीति विधिरेष निमंत्रणे ॥ श्राद्धे नैदिपि निमंत्रणं कार्यमित्याह मनुः ॥
पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते ॥ निमंत्रयीत त्र्यवरान्सम्यग्विप्रान्यथोदितान् ॥ ॥ निमंत्रणकर्ता रोबृहस्पतिस्मृतौ ॥ ॥
उपवीती ततो भूत्वा देवतार्थं द्विजोत्तमान् ॥ अपसव्येन पित्र्ये च स्वयं शिष्योऽथवा सुत इति ॥ ॥ निमंत्रयेदिति शेषः ॥ ॥

श्रा॰चं॰ ॥ब्राह्मणसंख्यामाह वसिष्ठः॥ द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा॥ भोजयेत्सुसमृद्धोपि न प्रसज्येत विस्तरे॥ विस्तरे च ब्राह्मण
निमंत्रणक्रियादिरूपेण प्रसज्येत न प्रवर्तेत॥ ॥विस्तरे दोषमाह मनुः॥ सत्क्रियां देशकालौ च द्रव्यं ब्राह्मणसंपदं॥ पंचैतान्विस्तरो हंति
१ तस्मान्नेहेत विस्तरं॥ सत्क्रियां नसंस्कारविशेषरूपा॥ शास्त्रोक्तं॥ ब्राह्मणसंपच्छ्रोत्रियपंक्तिपावनादेर्वालाभः॥ तथा चायमर्थः॥ ब्रा
ह्मणबाहुल्यं पंचैतान्नाशयति॥ तद्ब्राह्मणबाहुल्यं न कार्यं॥ यस्तु ब्राह्मणबाहुल्ये सत्क्रियादिसंपादनेन समर्थः सन् हेमाद्र्यादिमह
निबंधेषूक्तमेकैकस्य स्थाने पित्र्ये स्था॰ अन्येन वसप्तपंच त्रीन्स्त्रीन्वा दैविके दशाष्टषट्चतुरो येवं वस्तु बाहुल्यमपि कुर्यात्॥ ॥अत्र वृद्धा नानिरे
मादिपराशरमाधवादिषु द्रष्टव्यानि॥ ॥वृद्धवसिष्ठः॥ ॥श्राद्धं द्वयं करिष्यंस्तु दश वा चतुरोपि वा॥ त्रीन्वा निमंत्रयेद्विप्रानेकं वा ब्र
ह्मवादिनमिति॥ ॥योगी॥ ॥द्वौ दैवे प्राक्त्रयः पित्र्य उदगेकैकमेव वा॥ मातामहानामप्येवं तंत्रं वा वैश्वदेविकमिति॥ पितृमाता
महयोः श्राद्धे वैश्वदेविकं कर्म तंत्रेण वा कार्यमिति तुर्यपादार्थः॥ अत्र समर्थप्रतिप्रकारांतरमाह देवलः॥ एकेनापि हि विप्रेण षट्पिंडं
श्राद्धमाचरेत्॥ षडर्घ्यान्दापयेत्तस्मै षड्भोज्यं दद्यात्तथासनमिति॥ षट्पिंडमित्यादि दर्शश्राद्धाभिप्रायेण॥ वसिष्ठोपि॥ अपि वा भो हेरंब
जयेदेकं ब्राह्मणं वेदपारगं॥ श्रुतशीलवृत्तसंपन्नं सर्वलक्षणवर्जितं॥ अस्मिन्पक्षे वैश्वदेविके प्रकारांतरमाह॥ ॥स एव॥ १
यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत्॥ अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य तु॥ देवतायतने कृत्वा ततः श्राद्धं प्रवर्तयेत्॥ प्रास्येदं

नंतदग्नौ तु दद्याद्वा ब्रह्मचारिणे॥ अस्यार्थः॥ सर्वस्मादुद्धृतादन्नात्किंचित्पात्रांतरे गृहीत्वा विश्वेदेवोद्देशेन पात्रालंभनपूर्वकं संक
पि ल्पपश्चाग्निमंत्रितविप्रस्य परिवेषितमन्नं च देशेन त्यजेत्पश्चाद्देवनिवेदितमन्नं ब्रह्मचारिणे दद्यात्तदलाभे ग्नौ दहेदिति॥
शंखोप्याह॥ भोजयेदथवाप्येकं ब्राह्मणं पंक्तिपावनं॥ दैवे कृत्वा तु नैवेद्यं पश्चात्तस्य तु निर्वपेत्॥ ॥पंक्तिपावनलक्षणमु
क्तं मनुना॥ ॥अपांक्त्योपहता पंक्तिः पाव्यते यैर्द्विजोत्तमैः॥ तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान्पंक्तिपावनानिति॥ वि
प्रस्य गृहीतश्राद्धनिमंत्रणस्यागे दोषमाह मनुः॥ केतितस्तु यथान्यायं हव्ये कव्ये द्विजोत्तमः॥ कथंचिदप्यतिक्रामे ८
त्पापः सूकरतां व्रजेदिति॥ कथंचिदिति निमित्तान्बहुदक्षिणालोभादिना न तु भोजनासामर्थ्येनेत्यर्थः॥
विप्राभावे दर्भबटौ श्राद्धं कार्यं॥ ॥निधाय वा दर्भबटूनासनेषु समाहितः॥ प्रैषानुप्रैषसंयुक्तं विधानं प्रति
पादयेदिति देवलोक्तेः॥ तादृशीं दाहरणे संकल्पितान्नप्रतिपत्तिमाह॥ स एव॥ पात्राभावे क्षिपेदग्नौ गवे द
द्यात्तथाप्सु वा॥ ननु प्राप्तस्य लोपापत्तिः पितृकस्य विशेषतद् इति॥ अथ दिनपूर्वाह्णकृतमाह देवलः॥
तथैव यंत्रितो दाता प्रातः स्नात्वा सह द्विजैः॥ आरभेत नवैः पात्रैरन्वारंभं च बांधवैः॥ पावकमिति शेषः पूरणीयः॥

श्रा. चं. अशक्तः स्वयंपाकारंभमात्रं कृत्वा नारंभं बांधवैः स्वमाता पितृवंश्यैः कारयेदिति तूर्यपादार्थः ॥ केचित्तु स्वकेऽनारं
१० भं बांधवैरिति एव पाक्तः पाठः ॥ आश्वलायनोपि ॥ समानप्रवरैर्भिन्नैः सपिंडैश्च गुणान्वितैः ॥ कृतोपकारिभिश्चैव
पितृपाकः प्रशस्यत इति ॥ पत्न्याः पाककर्तृत्वे ॥ लिंगे हेमाद्रौ प्रभासखंडे ॥ अथैतानि पपाचाशु सीताजनकनंदिनीति ॥
व्यासोपि ॥ गृहिणी चेव तु स्नाता पाकं कुर्यात्प्रयत्नत इति ॥ तत्र वर्ज्या ब्राह्मे ॥ रजस्वला च पाखंडा पुंश्चली पतिता तथा ॥
सजेष्टूद्रा तथा वंध्यां विधवां चान्यगोत्रजां ॥ व्यंगकर्णा चतुर्थाहः स्नातामपि रजस्वलां ॥ वर्जयेच्छ्राद्धपाकार्थममातृपितृ
वंशजामिति ॥ ॥ पाकपात्राणि हेमाद्रावादित्यपुराणे ॥ ॥ पचेदन्नानि सुस्नातः पात्रेषु शुचिषु स्वयं ॥ स्वर्णादिधातुजा
तेषु मन्मयेष्वपि वा द्विजः ॥ अच्छिद्रेषु विलिप्तेषु तथानुपहतेषु च ॥ नायसेषु न भिन्नेषु दूषितेष्वपि कर्हिचित् ॥ पूर्व
कृतोपयोगेषु मन्मयेषु न तु कर्हिचित् ॥ इति मार्कंडेयः ॥ अह्नः षट्सु मुहूर्तेषु गतेषु त्वथ तान्द्विजान् ॥ प्रत्येकं प्रेषयेत्प्रे
ष्यान्स्नानायामलकोदकं ॥ प्रेषयेदिति पूर्वेणान्वयः ॥ ॥ वराहपुराणे ॥ प्रभातायां च शर्वर्यामुदिते च दिवाकरे ॥ १०
दिवाकीर्त्तिं निमान्यीय प्रवपाय विधिपूर्वकं ॥ श्मश्रुकर्म च कर्तव्यं नखच्छेदस्तथैव च ॥ स्नापनाभ्यंजनं दद्यात् हेरंब
पितृभक्तिसमुत्सुंदरी ॥ दिवाकीर्त्तिर्नापितः ॥ प्रभासखंडे ॥ ततोपराह्णसमयं प्राप्य कर्ता समाहितः ॥ स्वयं

समाहूयेद्विप्रान्सर्वेर्षिसमाप्नुयात् ॥ मार्कंडेयः ॥ स्नातः स्नातान्समाहू तान्स्वागतेनार्चयत्पृथगिति ॥ सौरपुराणे ॥ उपवेश्य त
तो विप्रान्दत्वा चैव कुशासनं ॥ पश्चाच्छ्राद्धस्य रक्षार्थं तिलांश्च विकिरेत्ततः ॥ ऋष्यशृंगः ॥ दक्षिणं पातयेज्जानुं देवान्परिचरन्सदा ॥ ॥
पातयेदितरं जानुं पितॄन्परिचरन्सदा ॥ बोधायनः ॥ प्रदक्षिणं तु देवानां पितृणामप्रदक्षिणं ॥ देवानामृजवो दर्भाः पितृणां द्वि
गुणास्तथा ॥ ॥ शंखः ॥ आवाहनार्घ्यसंकल्पे पिंडदानान्नदानयोः ॥ पिंडाभ्यंजनकाले तु तथैवांजनकर्मणि ॥ अक्षय्या
सनपाद्येषु गोत्रं नाम प्रकाशयेत् ॥ क्षणे च पिंडदाने च गंधधूपाक्षयेतथा ॥ संकल्पे चासने दीपे अंजनाभ्यंजने तथा
॥ अन्नार्घ्यदानात्यंतेषु गोत्रं नाम प्रकाशयेत् ॥ मात्स्ये ॥ संबंधं प्रथमं ब्रूयान्नाम गोत्रे तथैव च ॥ पश्चाद्रूपं विजानीयात्
क्रम एषः सनातनः ॥ स्मृत्यर्थसारे ॥ गोत्रस्यत्वपरिज्ञाने काश्यपं गोत्रमुच्यते ॥ कारिकायां ॥ नामानि चैव जानी
यात्तेत्यादिवरेक्रमात् ॥ नामोच्चारणे विशेषमाह ॥ बोधायनः ॥ शर्मांतं ब्राह्मणस्योक्तं वर्मांतं क्षत्रियस्य तु ॥
गुप्तांतं चैव वैश्यस्य दासांतं शूद्रजन्मनः ॥ गोभिलः ॥ दांतं नाम स्त्रीणामिति ॥ अविभक्तिकं श्राद्धं व्य
र्थमित्याह ॥ नारायणः ॥ विभक्तिभिस्तु यत्किंचिद्दीयते पितृकर्मणि ॥ तत्सर्वं सफलं ज्ञेयं विपरीतं निरर्थकं ॥

श्रा॰ चं तासां नियम उक्तो नारदीये ॥ असंख्याः सनयोः षष्ठी द्वितीया वाहनेतथा ॥ अन्नदाने चतुर्थी स्याच्छेषाः संबुध्यः स्मृताः ॥ प्रमा
११ सखंडे ॥ यज्ञोपवीतिना कार्यं दैवकर्म प्रदक्षिणं ॥ प्राचीनावीतिना कार्यं पितृकर्माप्रदक्षिणं अनुपनीतस्त्रीशूद्राणा
मुपवीतस्थानेत्तरीयं ॥ स्मृत्यंतरे ॥ आधारं भेनुयेद्दर्भाः पादशौचे विसर्जयेत् ॥ अर्चनादौ नुयेद्दर्भा उच्छिष्टांते विस
र्जयेत् ॥ मार्जनादौ नुयेद्दर्भाः पिंडस्थाने विवर्जयेत् ॥ उत्तानादौ नुयेद्दर्भा दक्षिणांते विसर्जयेत् ॥ प्रार्थनादौ नुयेद्द
र्भान्नमस्कारे विसर्जयेत् ॥ आधारं प्रेवसाने च पादशौचार्चनांतयोः ॥ विकिरे पिंडदाने च षट्सु स्याच्च
मनभिघ्यते ॥ आद्यंतयोस्तु द्विरावामेत ॥ आद्यंतयोर्द्विराचामेच्छेषाणि तु सकृत्सकृदिति हेमाद्रौ संग्र
हेक्तेः ॥ अमरदिनेः ॥ स्मृतौ स्तोत्रजपं त्यक्त्वा पिंड घ्राणं च दक्षिणा ॥ आवाहनं स्वागतं चार्घ्यं विना च
परिवेषणं ॥ विसर्जनं सौमनस्यमाशिषं प्रार्थनं तथा ॥ विप्रप्रदक्षिणां चैव स्वस्ति वाचनकं विना ॥
पितृनुद्दिश्य कर्तव्यं प्राचीनावीतिना सदा ॥ विष्णुः ॥ मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः ॥
मंत्रोहेन यथान्यायं शेषाणां मंत्रवर्जितं ॥ नारदीयसंग्रहे ॥ तिथिवारादिकं ज्ञात्वा संकल्प्य च नय ११

स्वविधिं ॥ प्राचीनावीतिना कार्यं सर्वसंकल्पनादिकं ॥ तत्रैव ॥ प्रायश्चित्तविशुद्ध्यात्मा तेभ्योनुज्ञां प्रगल्भ च ॥ दद्याद्दैवे बसदं
अर्घ्यं हिरण्यं कुशामेव वा ॥ हेमाद्रौ शंभुः ॥ संमार्जितोपलिप्ते तु द्वारि कुर्वीत मंडले ॥ उदक्प्लवमुदीच्यं स्याद्दक्षिणे दक्षिणप्लवं ॥ णा वृ
द्वारि द्वारसमीपे गृहांगण इति यावत् ॥ तदुक्तं संग्रहे ॥ प्रांगणे मंडलं कुर्याद्दैवे पित्र्ये च कर्मणि दूरतः ॥ मात्स्ये पि ॥ पूर्वमा
साद्य तत्सर्वं भवनस्याग्रतो भुवि ॥ गोमयेनोपलिप्तायां गोमूत्रेण च मंडले ॥ कार्यद्वितिशेषः ॥ तत्परिमाणमाकारश्च
संग्रहे ॥ प्रादेशमात्रं दैवानां चतुरस्रं च मंडलं ॥ स्यक्का षडंगुलं तस्माद्दक्षिणे वर्तुलं तथा ॥ तथा प्रादेशमात्र ॥ लौगा
क्षि णाप्यधिकमप्युक्तं परिमाणं ॥ हस्तद्वयमितं कार्यं वैश्वदेविकमंडलं ॥ तद्दक्षिणे चतुर्हस्तं पितॄणां मंप्रिशोध
ने ॥ हेमाद्रौ भृगुः ॥ अत्यंतजीर्णदेहाया वंध्यायाश्च विशेषतः ॥ आर्ता या नव सूतायां न गोर्गोमयमाहरेत् ॥
मंडलार्थमित्यर्थः ॥ एवंविधं मंडलं संपूज्य तत्र विप्रपादक्षालनं विदध्यादिति प्रोक्तं मात्स्ये ॥ अक्षताभिस्सु
पुष्पाभिस्तदभ्यर्च्यापसव्यवत् ॥ विप्राणां क्षालयेत्पादावभिवंद्य पुनः पुनरिति ॥ वृद्धवसिष्ठः ॥ न कुर्यात्कंथि
हस्तस्तु पाद्यं दद्याद्विचक्षणः ॥ गोविंदार्णवे व्यासः ॥ गंधियस्य पवित्रस्य विप्रपादाभिषेचने ॥ यथा वज्र

श्रा०चं० हतो रक्षो देवताः पितरस्तथेति ॥ एतादिनाभ्यक्तपादयोः पाद्यं देयं ॥ तथा च श्रीरामायणे ॥ पादशौचमर्घ्यं गं तिलहीनं च तर्पणं ॥ न
१२ तत्सर्वं त्रिजटे तुभ्यं यच्च श्राद्धमदक्षिणं ॥ एतच्चासीनानां कार्यं ॥ पादप्रक्षालनं कार्यमुपवेश्यासने द्विजान् ॥ तिष्ठतां चाल
नं कुर्यान्निराशाः पितरो गता इति संग्रहात् ॥ स्वयमप्यासीनेन कार्यं ॥ तिष्ठन्प्रक्षालयेत्पादौ दैवे पित्र्ये च कर्मणि ॥ दे
वा हव्यं न गृह्णन्ति कव्यानि पितरस्तथेति ॥ गौतमोक्तेर्निषेधश्रवणात् ॥ एतच्च प्रत्यङ्मुख एव कुर्यादित्याह वसि
ष्ठः ॥ दिवा वा यदि वा रात्रौ न कुर्यात्प्राङ्मुखः शुचिः ॥ प्रत्यङ्मुखस्तु कुर्वीत विप्रपादाभिषेचनमिति ॥ रात्रा
वितितीर्थश्राद्धाभिप्रायेण ॥ ब्रह्मांडे ॥ ततस्तु मंडले शुद्धे विप्राः प्रक्षालिताङ्घ्रयः ॥ कुर्यु राचमनं सर्वे मंडलोत्तरतः स्थिताः ॥ श्राद्धकर्ता
थ भूयोथ समाचम्य यथाविधीति ॥ तदनु विधेयमाह क्रतुः ॥ दर्भपाणिर्द्विराचम्य लघुवासा जितेंद्रियः ॥ परिश्रितेषु चोदं भो
गोमयेनोपलेपिते ॥ दक्षिणप्रवणे सम्यगाचान्तान्प्रणतान्शुचीन् ॥ आसनेषु सदर्भेषु विविक्तेषूपवेशयेदिति ॥ विवि
क्तेषु परस्परमसंलग्नेषु ॥ ॥ उपवेशनमंत्रमाह धर्मः ॥ आन्वालभ्य ततो देवानुपवेश्य ततः पितॄन् ॥ समस्ताभिर्व्याहृति
भिरासनेषूपवेशयेदिति ॥ यमः ॥ आसनं संस्पृशन् सव्येन पाणिना दक्षिणेन ब्राह्मणमुपसंगृह्य समाध्वमिति चो १२
पवेशयेत् ॥ पैठीनसिः ॥ प्राङ्मुखान्द्विश्वान्देवानुपवेशयेदासनेषु पितॄन्दक्षिणपूर्वेति ॥ पितॄन्दक्षिणस्यां प्राक्संस्था

नुपवेशयेदित्यर्थः ॥ ब्रह्मांडे ॥ रक्षार्थं पितृसत्रस्य त्रिः कृत्वः सर्वतो दिशं ॥ तिलांश्च प्रक्षिपेन्मंत्रमुच्चार्यापहता इति ॥ ब्राह्मे ॥ ह
विषां संस्कृतानां तु पूर्वमेवापवर्जनं ॥ मंत्रसंपूताभिरद्भिश्च प्रोक्षणं तु विधीयत इति ॥ अस्यार्थः ॥ संस्कृतानां निष्पन्नानां
हविषां पितृपाकानां पूर्वमादावपवर्जनं पतितनग्नाचाररहितादिदुष्टदृष्टिनिपातराहित्यं विधेयं यदर्थं कर्तुमशक्यंत
दा मंत्रसंपूताभिरद्भिः श्राद्धपाकाः प्रोक्षणीया इति ॥ ततः आसनदानादीनि धूपदीपाच्छादनान्तानि पदार्थानुसमय
पक्षेण कांडानुसमयपक्षेण वा कर्तव्यानि ॥ पदार्थानुसमयो नामासनावाहनार्घ्यदानगंधपुष्पादिदानानां दै
वे पित्र्ये च पूर्वपूर्वपदार्थपरिसमाप्त्यानुष्ठानं ॥ कांडानुसमयस्त्वेनां सर्वपदार्थान् दैवे कृत्वा पश्चात्पित्र्ये तु ष्ठानं ॥
आश्वलायनः ॥ अपः प्रदाय दर्भान्द्विगुणभुग्नानासनं प्रदायापः प्रदापयेत् ॥ आसनं प्रदायेति समस्यार्थे द्वि
तीया ॥ उपवेशनस्य प्राक्चोदितत्वादिति कृतिकृत् ॥ इदं दर्भदानं देवानां दक्षिणे पितॄणां वामभागे कार्यं ॥
तदुक्तं नागरखंडे ॥ ऋजुभिः साक्षतैर्दर्भैः सोदकैर्दक्षिणां दिशि ॥ देवानामासनं दद्यात्पितॄणां त्वनुपूर्वशः ॥
विषमैर्द्विगुणैर्दर्भैः सतिलैर्वामपार्श्वगैरिति ॥ अत्र द्विजैः स्वासनमिति प्रतिवचनं प्रयोक्तव्यं ॥ गंधमाल्यास
नादीनां प्रदाने पृद्विजोत्तमः ॥ सुगंधोस्तु सुदीपोस्तु चेत्यादि समुदाहरेदिति नागरखंडात् ॥ आवाहनं स्व

चं॰श्रा॰ त्रिषु द्विधा दृश्यते क्वचिदर्घ्यदानोत्तरं क्वचि दर्घ्यपूरणोत्तरं ॥ तत्र यथागृह्यं व्यवस्था ॥ आश्वलायनानां तु अ
१३ र्घ्यपूरणोत्तरमेव[redacted] ॥ तद्गृह्यपरिशिष्टे तथैव कथितत्वात् ॥ ॥ अथार्घ्यादिविधिः ॥ तत्रादौ दैवे स्मृत्यंतरे ॥ अथ
दर्भान्समास्तीर्य प्रागग्रान्यवानुवि ॥ स्थापयेदर्घ्यपात्रे द्वे न्युब्जेन तु कुशोपरि ॥ द्वे पवित्रे विधिवत्पा
त्रयोश्चोपरि निक्षिपेत् ॥ वसिष्ठः ॥ तूष्णीं प्रोक्ष्याथ तत्पात्रे कुर्याद्दर्भे विलोकितः ॥ पूरयेत्पात्रयुग्ममनु कूर्चोपरि
पवित्रकमिति ॥ पराशरः ॥ प्राङ्मुखोमरतीर्थेन शंनोदेव्युदकं क्षिपेत् ॥ यवोसीति यवांस्तत्र तूष्णीं पुष्पा
णि चंदनं ॥ अत्रोदकक्षेपणे शंनोदेवीरिति मंत्रस्य विनियोगः तुकः सर्वशाखांतरविषयः ॥ बह्वृचानां तु द
र्भांतर्हितेषु पात्रेषु आसिच्य शंनोदेवीरभिष्टय इत्यनु॰नि॰ मंत्रितासु तिलानावपेत् तिलोसीति सूत्रेणानुमंत्र
स्य विहितत्वात् ॥ पितॄणां विशेषः संग्रहे ॥ ॥ पात्राण्यासाद्य चाग्नेय्यां दिक्संस्थेषु कुशेषु च ॥ त्रीन्स्त्री
न्स्थापयेद्दर्भान्प्रत्येकं भाजनत्रये ॥ गार्ग्यः ॥ हस्तप्रादेशमात्रं तु त्रिवत्कृत्वा पवित्रकं ॥ अभ्य[redacted]र्घ्यपूर्वतो हेरंब
र्घ्यं वै दद्यात्तु पितॄदिङ्मुखदूरतः ॥ त्रिवत्त्रिरत्नं ॥ इत्येतैः अर्घ्यदानात्प्राक् ॥ स्मृत्यंतरे ॥ दैव्यर्चा दक्षिणादि १३

स्यासात्रानवं समर्पयेत् ॥ शिरोंगजानुपादेषु वा सांगादिषु पेत्सके ॥ अर्चा पूजा आवाहनरूपा ॥ ब्राह्मे ॥ ततो वामेन
हस्तेन गृहीत्वा च भस्माक्षमात्रं ॥ ततो यदक्षिणे हस्तरे वसतीर्थेन दापयेत् ॥ ततः आवाहनोत्तरं ॥ पितॄणां त्वाह आश्व
लायनः ॥ उत्तरपाण्यंगुष्ठांतरेणोपवीती त्वा दक्षिणेन वा सव्योपगृहीतेन पितरिदं तेऽर्घ्यं पितामहेदं तेऽर्घ्यं प्र
पितामहेदं तेऽर्घ्यमित्यपसव्ये तातः प्रतिमाह पिष्वं स्व कृत सकृत्स्वधा अर्घ्या इति ॥ उत्तरस्य सव्यस्य पाणेरंगु
तत्या ष्ठांतरेणार्घ्यं प्रयच्छेदथ वा सव्यपाणेः पितृगृहीं दक्षिणपाणिं सव्येन गृहीत्वा दक्षिणेनैव पाणिना उप वी
त्येव अर्घ्यं प्रयच्छेदिति नारायणवृत्तिकृत् ॥ अत्रैकैकस्यानेकब्राह्मणपक्षे पित्रर्थं यावंतो ब्राह्मणास्तेभ्यः
सर्वेभ्यः प्रथममेव पात्रं विभज्य सकृदेव दद्यात् ॥ तथा पितामहार्थेभ्यो द्वितीयं प्रपितामहार्थेभ्यस्त यं
तीयं सकृदेव ॥ एकैकपक्षे तु एकैकं पात्रमेकैकस्मै दद्यात् ॥ एकपक्षे त्रयोप्यर्घ्या [redacted] एकस्मै क्रमेण देयाः ॥
अर्घ्यदानोत्तरं कल्पनाह प्रचेताः ॥ प्रथमे पितृपात्रे तु सर्वान्संस्रवसंस्रवान् ॥ पितृभ्यः स्थानमसीति न्युब्जं कुर्याद्
भावधोमुखं ॥ संस्रवानर्घ्यपात्रगतजलशेषान् उत्तरे द्वे पात्रे प्रथमपात्रे आसिंचतीत्यर्थः ॥ तथा च यमः ॥ म

पैतृकं प्रथमं पात्रं तस्मिन्पैतामहं न्यसेत्॥ प्रपितामहं ततो न्यस्य नोद्धरेन्न च चालयेत्॥ ॥इति यमो मात्स्ये॥ ॥पितृपा
त्रे निधायान्यं न्युब्जमुत्तरतो न्यसेत्॥ इति षड्देवत्यश्राद्धे॥ आद्यं पात्रद्वयं न्युब्जं कर्तव्यमिति संप्रदायविदः॥ माता
महानामप्येवमित्यतिदेशात्॥ आश्वलायनः॥ नोद्धरेत्प्रथमं पात्रं पितॄणामर्घ्यपातितं॥ आवृतास्तत्र तिष्ठंति पि
तरः शौनकोऽब्रवीत्॥ आश्राद्धसमाप्तेरिति शेषः॥ अर्घ्यपात्राण्याह प्रजापतिः॥ सौवर्णं राजतं ताम्रं खड्गं मणि
मयं तथा॥ यज्ञियं चमसं वापि अर्घ्यार्थं पूरयेद्बुधः॥ आश्वलायनः॥ तैजसाश्ममृन्मयेषु त्रिषु पात्रेष्वेकद्रव्येषु वे
ति॥ अनंतरं विधेयमाह याज्ञवल्क्यः॥ दत्वोदकं गंधमाल्यं धूपदानं सदीपकं॥ अर्घ्यांतरमुदकदानं पूर्वकं गंधादि
दद्यादिति वचोऽर्थः॥ अर्घ्यपिंडप्रदानं च स्वस्त्यक्षय्यं तथैव च॥ गंधपुष्पादिकं सर्वं हस्तेन च तु दापयेत्॥ इति गोभि
स्तिः॥ गंधदानादिवसरे विशेषमाह॥ ॥गोविंदार्णवे शातातपः॥ करे पवित्रं कृत्वा तु गंधमस्तु विलिप
ति॥ पितृयज्ञस्य तच्छिद्रं निराशाः पितरो गता इति॥ माधवीये यमः॥ भिक्षुको ब्रह्मचारी वा भोजनार्थ हेरंबु
मुपस्थितः॥ उपविष्टेष्वनुप्राप्तः काममन्नमपि भोजयेत्॥ भिक्षुकानाहात्रिः॥ ब्रह्मचारी यतिश्चैव

विद्यार्थी गुरुपोषकः॥ अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृता इति॥ कूर्मपुराणेपि॥ अतिथिर्यस्य नाश्नाति न तच्छ्रा
द्धं प्रचक्षते॥ अतिथिलक्षणमुक्तं विष्णुपुराणे॥ अज्ञानकुलनामानमन्यतः समुपागतं॥ पूजयेदतिथिं सम्यक्
नैकग्रामनिवासिनमिति॥ आच्छादनं॥ हेमाद्रौ पाद्मे॥ संपूज्य गंधपुष्पाद्यैर्दद्यादाच्छादनं ततः॥ अधौतं सद
शं न्यूनं निश्छिद्रममलीमसं॥ तस्याभावे तु देयं स्यात्तद्वर्णैः क्षालितं तु यत्॥ प्रदेयं पितृकार्येषु कारुधौतं न जा
तु चित्॥ कारुरजकः॥ प्रभासखंडे॥ आच्छादनं तु यो दद्यादहतं श्राद्धकर्मणि॥ आयुः प्रकाममैश्वर्यं रूपं च लभ
ते तु सः॥ अहतलक्षणान्याह प्रचेताः॥ ईषद्धौतं नवं श्वेतं सदशं नान्यधारितं॥ अहतं तद्विजानीयात्सर्वकर्म
सु पावनमिति॥ ईषद्धौतं अकारुधौतमिति हेमाद्रिः॥ भगवती पुराणे॥ अधरीयोत्तरीयार्थं पुद्विश्वेके कुमा
दरात्॥ वासोयुगं प्रदातव्यं पितृकृत्ये विपश्चिता॥ निष्क्रयो वा यथाशक्ति वस्त्रालाभे प्रदीयते॥ ब्रह्मवैवर्ते॥ ॥
यज्ञोपवीतं दातव्यं वस्त्राभावे विपश्चिता॥ पितॄणां वस्त्रदानस्य फलं तेनाप्नुते खिलं॥ समर्थस्य निष्क्रयोसम
र्थस्य यज्ञोपवीतमिति वाचस्पति विकल्पः॥ विष्णुधर्मोत्तरे॥ स्त्रीणां श्राद्धे तु सिंदूरं दद्युश्चंडातकानि च॥

श्रा॰ चं॰। निमंत्रिताभ्यः स्त्रीभ्यो येते स्युः सौभाग्यसंयुताः॥ चंडातकानि स्त्रीपरिधानोपचितान्यंशुकानीति हेमाद्रिः॥ ब्रह्मां
१५ डे॥ नामगोत्रं गृहीत्वा नीलीरक्तस्य वाससः॥ दर्शनात्कीर्तनान्नीत्या निराशाः पितरो गताः॥ आच्छादननिरूपणं॥
पूर्ववस्त्रप्रतिनिधित्वेनोपवीतदानमुक्तमधुना सत्यपि वस्त्रे गंधपुष्पादिवन्मुख्यत्वेन यज्ञोपवीतं दातव्यमित्यु
च्यते॥ हेमाद्रावादित्यपुराणे॥ पितृन्सत्कृत्य वासोभिर्दद्याद्यज्ञोपवीतकं॥ यज्ञोपवीतदानेन विना श्राद्धं तु निष्फलं॥
तस्माद्यज्ञोपवीतस्य दानमावश्यकं स्मृतमिति॥ एतच्च वैश्वदेवकांड उदङ्मुखः पित्र्ये दक्षिणामुखः कुर्या
त्॥ उदङ्मुखस्तु देवानां पितॄणां दक्षिणामुखः॥ प्रदद्यात्पार्वणे सर्वं देवपूर्वं विधानतः॥ इति॥ शातातपवचना
त्॥ कालिकापुराणे॥ निर्वर्त्य ब्राह्मणादेशात्क्रियामेवं यथाविधि॥ पुनर्भूमिं च संशोध्य पंक्तेरंतरमाचरेत्॥
भाजनानि ततो दद्यात् प्रस्तरोर्ध्वं पुनः क्रमात्॥ भस्मशोधनमर्दनप्रसंगात्तु तिलगंधपुष्पदर्भोपनयनं॥ अंतरं विच्छित्तिः॥
भोजनपात्राधो भस्मना मंडलमाह शंखः॥ आदित्या वसवो रुद्रा ब्रह्मेंद्रार्कनिशाकराः॥ मंडलान्युपजीवंति तस्मात्कु
र्वीत मंडलं॥ बौधायनः॥ चतुरस्रं त्रिकोणं च वर्तुलं चार्धचंद्रकं॥ कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलं॥ ॥ १५

ततः साधनानि ब्राह्मे॥ मंडलानि च कार्याणि नीवारैः सक्तुभिः शुभैः॥ गौरमृत्तिकया वापि भस्मना गोमयेन वेति॥ तन्नि
र्णयप्रकारः स्मृत्यंतरे॥ नैर्ऋतीं दिशमारभ्य ऐशान्यंतं समापयेत्॥ तामेव दिशमारभ्य दैविकस्य तदंतिके॥ ऐशानीं दिश
मारभ्य नैर्ऋत्यामप्रदक्षिणं॥ तामेव दिशमारभ्य पैतृकस्य तदंतिके॥ मंडलाकरणे दोषस्तु मार्कंडेयपुराणे॥ यातुधा
नाः पिशाचाश्च क्रूराश्चैव च राक्षसाः॥ हरंति रसमन्नस्य मंडलैर्हि विवर्जिते॥ श्राद्धदीपकलिकायां॥ अकृत्वा भस्म
मर्यादां यः कुर्यात्पाणिशोधनं॥ आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठतीति संक्षेपः॥ अथाग्नौकरणं हेमाद्रौ याज्ञ
वल्क्यः॥ अग्नौ करिष्यन्नादाय पृच्छेदन्नं घृतप्लुतं॥ कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवत्॥ हुत्वा जुहुयादित्यर्थः
॥ तच्च॥ स्मार्तकर्म विवाहाग्नौ कुर्वीत प्रत्यहं गृही॥ दायकालाहृते वापि श्रौतं वैतानिकाग्निषु॥ इति याज्ञवल्क्यवचना
दौपासनेऽग्नौ कार्यं॥ तत्र सर्वेषामौपासन एव प्राप्ते कश्चिद्विशेषं मार्कंडेयः॥ आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ स
माहितः॥ अनाहिताग्निश्चौपसदेऽग्न्यभावे द्विजेऽप्सु वेति॥ × माह × अग्न्यभावे उभयविधाग्न्य × हु × भावे॥ औप
सदे गृह्याग्नौ॥ द्विजे द्विजपाणौ॥ आहिताग्निः सर्वाधानी॥ अर्धाधानी गृह्याग्निमतो गृह्याग्निसद्भावात्तत्रैव भ
वति॥ इदं च सर्वाधानिनो दक्षिणाग्नावग्नौकरणं दर्श एव॥ पक्षांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः॥ पिंडयज्ञं

१ वार्षिकादौ तु सर्वाधानी पाणौ कुर्यान्नाहरागेरभावात् ॥ ×

श्रा॰ चं॰ ततः कुर्यात्ततोन्वाहार्यकं तु धर इति लौगाक्षिः ॥ एतद्विहृतदक्षिणाग्निसद्भावात् ॥ इतरो गृह्य एव ॥ वृत्तिकारस्त्वाश्व ला
१९ यनास्याहिताग्नेः सर्वत्र पाणिहोममेवाह ॥ अनुष्ठानमपि आश्वलायनानां वृत्त्यनुसार्येवास्तीत्यल ॥ निष्कर्षेण ॥ आश्वला
यनः ॥ अभ्यनुज्ञां पाणिष्विति ॥ अन्नवत्तिः ॥ पाणिष्विति बहुवचननिर्देशात्सर्वविप्रपाणिषु होम इति ॥ शौनकोपि ॥
सर्वेषामुपविष्टानां विप्राणामथ पाणिषु ॥ विभज्य जुहुयात्सर्वं सोमायेत्यादिमंत्रतः ॥ यत्तु कात्यायनवचनं ॥ पित्र्येयः
पंक्तिमूर्धन्यस्तस्य पाणावनग्निकः ॥ हुत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेदिति तद्बह्वृचातिरिक्तपरमिति केचित्
॥ मम तु प्रतिभाति ॥ अनग्निकपदं वैयर्थ्यापातादनग्निकबह्वृचस्यैकत्रैवेति ॥ अनग्निकः देवब्राह्मणहस्ते होम
माह मदनरत्ने यमः ॥ अपत्नीको यदा विप्रः श्राद्धं कुर्वीत पार्वणं ॥ पित्र्यविप्रैरनुज्ञातो विश्वेदेवेषु हूयते ॥
जुहुयादित्यर्थः ॥ एवं चात्रानग्निकस्याग्नौकरणहोमे पित्र्यविप्रहस्तयोर्विकल्पः ॥ अग्न्यभावे तु सर्वेषां १९
पाणिहोम एव ॥ अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् ॥ योग्निः स द्विजो विप्रैर्मंत्रदर्शिभिरुच्यते ॥ इति मनू
क्तेः ॥ अग्न्यभावे तु विप्रस्य पाणौ दद्यात्तु दक्षिणे ॥ अग्न्यभावः स्मृतस्तावद्यावद्भार्यां न विंदतीति जातूकर्ण्य हेरंब
वचनाच्च ॥ तैत्तिरीयाणामेतावान्विशेषः ॥ अग्न्यभावे पाणिहोमेन ॥ किं तु लौकिकाग्नौ ॥ नष्टाग्निर्दूर

भार्यश्चेत्पार्वणे समुपस्थिते ॥ संधायाग्निं ततो होमं कृत्वा तं विसृजेत्पुनरिति त्रिकांडवचनात् ॥ क्वचित्साग्ने
रपि पाणिहोमः ॥ तथा च गृह्यपरिशिष्टे ॥ अन्वष्टक्यं च पूर्वेद्युर्मासिमासि च पार्वणं ॥ काम्यमभ्युदयेष्टम्या
मेकोद्दिष्टमथाष्टमं ॥ चतुर्ष्वाद्येषु साग्नीनां वह्नौ होमो विधीयते ॥ पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपीति ॥ एकोद्दि
श्री ष्टं सपिंडीकरणं केवलं तदभावात् ॥ हुताव ष्प्रतिपत्तिमाह यमः ॥ पित्र्यपाणिहुताच्छेषं पितृपात्रेषु निक्षिपे
त् ॥ अग्नौकरणशेषं तु न दद्याद्वैश्वदेविके ॥ ॥ अथ परिवेषणं ॥ ॥ शौनकः ॥ हुत्वाग्नौ परिविष्टं तु पितृपा
त्रेष्वनंतरं ॥ निवीतेनापसव्येन परिवेषणमाचरेत् ॥ व्यासः ॥ आज्याहुतिं विना यच्च यत्किंचित्परिविष्यते ॥
दुराचारैश्च यद्भुक्तं तद्भागं रक्षसां विदुः ॥ शौनकः ॥ पाकं सर्वं सुपानीयं सवेद्यं च पृथक्पृथक् ॥ विधिना
दैवपूर्वं तु परिवेषणमाचरेत् ॥ यजमानेन परिवेषणे क्रियमाणे फलानंत्यमाह धर्मः ॥ फलस्यानंत्यतां प्रा
प्ता स्वयं तु परिवेण इति ॥ भविष्ये ॥ भार्यायाः श्राद्धकालेषु प्रशस्तं परिवेषणं ॥ ब्रह्मांडे ॥ नापवित्रेण नैके
न हस्तेन न विना कुशं ॥ नायसेनायसेनैव श्राद्धे तु परिवेषयेत् ॥ पराशरः ॥ सर्व दा चातिला श्राद्धाः पितृ-

श्राद्धचं० कृत्ये विशेषतः॥ भोज्यपात्रे तिलान्दृष्ट्वा निराशाः पितरो गताः॥ कार्ष्णाजिनिः॥ दर्व्यादेयं घृतान्नं च समस्तं व्यंजना
२७ निच। उदकं यच्च पक्वान्नं नो दर्व्या दातुमिछति॥ स चोरः स च पापिष्ठो ब्रह्मघ्नं तं विनिर्दिशेत्॥ संग्रहे॥ हस्तद
त्तं तु नाश्नीयाल्लवणं व्यंजनं तथा॥ अपक्वं तैलपक्वं च हस्तेनैव प्रदीयते॥ घृतपात्रस्थापने विशेषो मदनरत्ने॥
घृतादिपात्राणि भूमौ स्थापयेन्न भोजनपात्रे इति मंथांतरे॥ ओदने परमान्ने च पात्रमाद्यं मृद्धधीः॥ घृतेन सा०
पूरयेत्पात्रं तद्घृतं रुधिरं भवेत्॥ एवंविधपरिवेषणानंतरं कर्तव्यमाह पारस्करः॥ संकल्प्य पितृदेवेभ्यः सा ह५
वित्रीं मधुमित्यृचः॥ आपोशानं निवेद्यापोशानं जुषध्वं प्रेषभोजनं॥ संकल्प्य प्रकारस्तु प्रयोगे वक्ष्यते॥ अत्र अ
प८ न्नसंकल्पोत्तरं गायत्रीजपपूर्वकं मधुमतीः पठित्वापोशनार्थं जलं दत्वा जुषध्वमिति प्रेषेण भोजनानु
ज्ञापनं कार्यमि ति वचनार्थः॥ एवं चात्र सावित्रीजपानंतरं मापोशानदानमुक्तं॥ विपरीतमाह प्रचे
ताः॥ अपोशानं प्रदायाथ सावित्रीं त्रिर्जपेत्तथा॥ मधुवाता इति त्र्यृचं माध्वित्येतत्त्रिकं तथा॥ अत्र पारस्कर २७
वचनं बह्वृचपरं प्रचेतोवचनं तदन्यपरं बोध्यं॥ उपवीत्यन्नेषु मधुसर्पिर्वा सिच्य सप्रणवव्याहृतिं हेरंब

सावित्रीं मधुमतीश्च जपित्वा मध्विति च त्रिरुक्त्वा पितृननुस्मृत्यापोशनं दत्वा पः प्रदाय ब्राह्मणान्यथासुखं जुष
ध्वमिति भोजनाय तिसृजेदिति बह्वृचगृह्यपरिशिष्टात्॥ याज्ञवल्क्यः॥ सव्याहृतिकां गायत्रीं मधुवाता
इति त्र्यृचं॥ जप्त्वा यथासुखं वाच्यं भुंजीरंस्ते पि वाग्यताः॥ यथासुखं जुषध्वमित्यनंतरं जुषध्वमिति शेषः पूरणी
यः॥ वाग्यताः वाचायताः नियताः॥ अधिकं न वदेयुरित्यर्थः॥ ननु मौनिनः॥ अनुपदमपेक्षितं याचितव्यमि
ति वक्ष्यमाणवचनेन विरोधात्॥ श्राद्धभोक्तारो बलिं न दद्युः॥ दत्ते वाप्यथवादत्ते भूमौ यो निक्षिपेद्बलिं॥ ॥
तदन्नं निष्फलं याति निराशैः पितृभिर्गतमिति पाराशरमाधवधृतात्रिवचनात्॥ दत्ते तु उक्ते अदत्त इत्यु
क्तौ॥ पराशरमाधवीये शंखः॥ श्राद्धपंक्तौ तु भुंजानो ब्राह्मणो ब्राह्मणं स्पृशेत्॥ तदन्नमत्यजंभुक्त्वा गायत्र्यष्ट
शतं जपेत्॥ तदन्नं पात्रगतं स्पृष्टोन्तरमन्यदन्नं न गृह्णीयादिति फलितोर्थः॥ उच्छिष्टान्नेन स्पर्शेनुसएव॥
उच्छिष्टलेपसंस्पर्शे प्रक्षाल्याच्चमेन वारिणा॥ भोजनांते नरः स्नात्वा गायत्रीं त्रिशतं जपेत्॥ अत्रा
पि भोजनं तावन्नेत्यस्यैव॥ भोजनभाजनस्यैव स्पर्शे त्वाह व्यासः॥ उच्छिष्टोच्छिष्टसंस्पर्शे स्पृष्टपात्रं विहाय च॥

श्राद्धचं॰ सर्वान्नं पूर्ववहिल्लिख्य भोजेये मुद्दिजोनममिति ॥ हेमाद्रावत्रिः ॥ हुंकारेणापि यो ब्रूयाद्धस्ताभ्यां विगुणान्वदेत् ॥ भूतला चोद्धरेत्पात्रं मुखं चैवडस्तेनवापि
११४८॥ वत् ॥ प्रौढपादो बहिः कक्षो वामे हि जानु करोथवा ॥ अंगुष्ठेन विना मात्रिमुख शब्देन वा पुनः ॥ पीतावशिष्टं तोयादि पुनरुद्धृत्य वापिबेत् ॥ खादितार्धं
पुनः खादेन्मोदकानि फलानि वा ॥ मुखेन वा धमेदन्नं निष्ठीवेद्भाजनेपि वा ॥ इत्येवमन्नं द्विजः भाखं ददन्नागच्छत्यधोगतिमिति ॥ उशनाः ॥ भोजनं तु न निः
शेषं कुर्यात्प्राज्ञः कथंचन ॥ अन्यत्र दध्नः क्षीराद्वा क्षौद्रात्सक्तुभ्य एव च ॥ इति शातातपः ॥ अपेक्षितं याचितव्यं श्राद्धार्थमुपकल्पितं ॥ नयाचयेद्द्विजोमं
मूढः सप्रत्येति वैधानकः ॥ यत्तु श्राद्धे द्विजो नैव दद्यान्नपानं नयेन्नयाचयेद्द्विजिव वस्त्रद्रव्यान्वितद्रव्यविषयं ॥ प्रचेताः ॥ भुंजानेषु तु विप्रेषु ऋग्यजुः साम
हा लक्षणं ॥ जपेदभिमुखो भूत्वा पिंडं नैव विशेषतः ॥ भोजनोत्तरकृत्यं समौद्गल्यायनः ॥ तृप्तान्ज्ञात्वा मधुमतीः श्रावयेदक्षन्नमीमदंतेति च संपन्नमिति पृष्ट्वे
ति ॥ ॥अथ पिंडदानं ॥ ॥ तत्र श्रीर्वनोन्नरमग्नौकरणोन्नरं भोजनोत्तरं विकिरोत्तरं स्वधावाचनोत्तरं विप्रविसर्जनोत्तरं चेति हेमाद्रौ स्मृतिषु पक्षा उक्ताः ॥
तेषां शाखाभेदेन व्यवस्था ॥ प्रेतश्राद्धेषु पूर्वमन्येषु भोजनोत्तरमिति चंद्रिकामाधवौ ॥ सर्वत्र भोजनोत्तरमिति बह्वृचः ॥ तत्काल महाश्वलायनः ॥ भु
क्तवत्सु नाचांतेषु पिंडान्निदध्यात् आचांते ष्वेक इति ॥ सर्वश्राद्धेषु भोजनोत्तरमेवेति ग्रंथकारः ॥ तद्देशमाह यात्तवल्क्यः ॥ सर्वमन्नमुपादाय सति हेमं॰
लं दक्षिणामुखः ॥ उच्छिष्टसन्निधौ पिंडान्दद्याद्वै पितृयज्ञवत् ॥ उच्छिष्टसन्निधिलक्षणमुक्तमत्रिणा ॥ पितॄणामासनस्थानाद्रत्नरत्निप्रमाणकेषु ॥ ११४८॥
उच्छिष्टसंनिधानं तन्नोच्छिष्टासनसंनिधौ ॥ साई ह विंशत्संगुलात्मकोरत्निः ॥ अत्र विशेषमाह देवलः ॥ उपलिप्ते समुद्धोद्देशे स्थानं कुर्वीत सैकतं ॥ मंडलं
न्यात् चतुर्गुणेनेव हिरण्येन सुरोचिषेति ॥ बौधायनः ॥ संक्रमे न द्विजाभावे प्रवासे पुत्रजन्मनि ॥ हेमश्राद्धं संग्रहे च द्विजः
शूद्रः सदाचरेदिति ॥ हेमान्नं चतुर्गुणं ज्ञेयं पूर्वोक्ताद्वाक्यात् ॥ स्मृत्यर्थसारे तु ॥ अष्टगुणं चतुर्गुणं द्विगुणं समं वोक्तं ॥
हिरण्यमष्टगुणं चतुर्गुणं समं वा दक्षिणं स्युक्त्वा पूर्ववत्समापयेदिति ॥ अत्राष्टगुणत्वादिकमा
द्विगुणं

श्रा. चं. ३८ हारमत्यापेक्षयावेदितव्यं ॥ एतेषां पक्षाणां शाखाभेदेन व्यवस्था ॥ अत्रापि पिंडदानं कार्यं ॥ गृहपाकासमुत्पन्नसक्तुभिः
पायसेन वा ॥ पिंडदानं प्रकुर्वीत हेमश्राद्धे कृते सति ॥ इति भविष्योत्तरात् ॥ आद्यादिश्राद्धेषूत्तानपिंडाः कार्या इत्युक्तं हे
माद्रौ भविष्योत्तरे ॥ आमश्राद्धे तु गृहपाकेन तत्सिद्धान्निर्वपेत्तथा ॥ सक्तुमूलफलैर्वापि पायसेनाथवा स्मृतमिति ॥ कलौ युगे तु श
द्राः सक्तुपिंडान्नैव कुर्वीत आचरात् ॥ ब्राह्मणेन ब्राह्मणस्यैवामादिनोक्तव्यं न तु कार्यं न दापयितव्यं ॥ हिरण्यमामश्राद्धी
स्या यं उआं यक्षत्रियादितः ॥ यथेष्टविनियोज्यं द्विजो याद्ब्राह्मणस्य यामिति व्यासोक्तेरिति दिक् ॥ ॥ अथ रात्र्यादौ श्राद्धनि
षेधः ॥ मनुः ॥ रात्रौ श्राद्धं न कर्तव्यं राक्षसी कीर्तिता हि सा ॥ संध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदित इति ॥ माधवेऽपि
वराघवसंवादे ॥ प्रातःकाले तु न श्राद्धं प्रकुर्वीत कदाचन ॥ नैमित्तिकेषु श्राद्धेषु न कालनियमः स्मृत इति ॥ स्कां
दे ॥ उपसंध्यं न कुर्वीत पितृपूजां कथंचन ॥ स्वकाले आसुरः प्रोक्तः श्राद्धं तत्र विवर्जयेत् ॥ अनुदि
यास्तमिती संध्या घटिकात्रयमिष्यते ॥ सायं संध्या त्रिघटिका ह्यस्तादुपरि भास्वत इति ॥ अत्र पा
रिभाषिता संध्या न ग्राह्या ॥ किंतु मुख्यैव मार्तंडमंडलास्तोदयकालरूपा ॥ पारिभाषिता या रात्र्यंत
र्गतत्वाद्रात्रिनिषेधेनैव तन्निषेधसिद्धेः ॥ मात्स्ये ॥ सायाह्नस्त्रिमुहूर्तः स्यात् श्राद्धं तत्र न कारयेत् ॥ राक्षसी नाम [illegible]

सांव ३८

च विषुवेष्ययने तथा ॥ भरणीषु च कुर्वीत पिंडनिर्वपणं [illegible]

अथ पिंडदाननिषिद्धकालः ॥ हेमाद्रौ बृहत्पराशर[illegible] ॥ युगादिषु मघायां विषुवद्दितये तथा ॥ युगादिषु च सर्वासु पिं
डनिर्वपणात्ते ॥ स्मृतिरत्नावल्यां ॥ पुत्रे जाते व्यतीपाते ग्रहणे चंद्रसूर्ययोः ॥ श्राद्धं कुर्यात्प्रयत्नेन पिंडनिर्वपणं ॥ तथा ॥
भानौ भौमे त्रयोदश्यां नंदाभृगुमघासु च ॥ पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणं ॥ अयं पिंडदाननिषेधस्ति
थिवारप्रयुक्तकाम्यश्राद्धविषयो बोध्यः ॥ अत एवोक्तं विश्वरूपनिबंधे ॥ तिथिवारप्रयुक्तो यो निषेधः समुदा
हृतः ॥ स श्राद्धेतरनिमित्तस्यान्नान्यश्राद्धे कदाचनेति ॥ महालयादौ रविवारादिष्वपि निर्वपेदित्याह अत्रिः ॥ महालये
क्षयाहे च रवौ पुत्रस्य जन्मनि ॥ तीर्थेऽपि निर्वपेत्पिंडान् रविवारादिकेष्वपीति ॥ विवाहादावुत्तरं निषेधमाह का
र्ष्णाजिनिः ॥ विवाहव्रतचूडासु वर्षमर्धं तदर्धकं ॥ पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणं ॥ हेमाद्रौ ज्योतिःप
राशरः ॥ विवाहे विहिते मासान्त्यजेयुर्द्वादशैव हि ॥ सपिंडाः पिंडनिर्वापं मौंजीबंधे षडेव हीति ॥ क्वचि
त्प्रतिप्रसवमाह ॥ तत्र स एव ॥ महालये गयाश्राद्धे मातापित्रोः क्षयेऽहनि ॥ यस्य कस्यापि मर्त्यस्य स

श्रा० चं० पिंडीकरणे तथा ॥ ऊढोद्वाहो विकुर्वीत पिंडनिर्वपणं सदेति ॥ स्मृत्यंतरे ॥ पिंडास्सपिंडनो दद्युः प्रेतपिंडान्विनात्र तु ॥ पितृ
यज्ञे च यज्ञे च गयायां दद्युरेव तु ॥ पितृयज्ञे पिंडपितृयज्ञे ॥ यत्तु पितृमेध्यां ॥ न सपिंडः ॥ इत्युशातातपः ॥ पिंडनिर्वप
३९ रहितं यत्तु श्राद्धं विधीयते ॥ स्वधावाचनलोपोत्र विकिरश्च न लुप्यते ॥ अक्षय्यदक्षिणास्वस्तिसौमनस्यं यथास्थितमि
ति ॥ ॥ अथ तर्पणं ॥ गर्गः ॥ पूर्वं तिलोदकं दत्वा अमाश्राद्धं तु कारयेत् ॥ प्रत्यब्दं न भवेत्पूर्वं परेहनि तिलोदकं ॥ पक्षश्राद्धे हि
रण्ये च अनुव्रज्य तिलोदकमिति ॥ इदं च श्राद्धांगतर्पणं भिन्नमेव ज्ञेयं न तु नित्यतर्पणस्यैव परेहन्युत्कर्ष इति ॥
दं प्रत्यब्दांगं तिलं दद्यादिति संग्रहवचनेंगग्रहणात् ॥ एतच्च ॥ यस्तर्पयति तान्विप्रः श्राद्धं कृत्वा परेहनि ॥ ते पिरक्तेन तर्पयंति
न वै कुप्यंति वै भरतां इति गर्गोक्तेः ॥ परेद्युः श्राद्धकृन्मर्त्यो यो न तर्पयते पितॄन् ॥ तस्य ते पितरः क्रुद्धाः शापं दत्वा व्रजंति हीति
बृहन्नारदीयलिखितवचनाच्च ॥ आवश्यकत्वाच्च श्राद्धेज्यवर्गस्यैव परेद्युः कार्यं ॥ प्रत्यब्दांगं तिलं दद्यान्निषिद्धेपि
परेहनि ॥ वर्गोक्तस्य क्षयो येषामन्येषां तु विवर्जयेत् ॥ इति संग्रहवचनात् ॥ तिलं तिलोदकं ॥ सकृन्महालये परेद्यु ३९

रेव ॥ सकृन्महालये चस्यादष्टकास्वंत एव हि इति गर्गवाक्यात् ॥ कपिलः ॥ मन्वादिषु युगाद्यासु दर्शे संक्रमणेषु च ॥ पौ
र्णमास्यां व्यतीपाते दद्यात्सुर्वे तिलोदकं ॥ अर्धोदये गजच्छायेष्वष्ट्यां चैव महालये ॥ भरण्यां च मघाश्राद्धे पिंडांते
तर्पणं भवेत् ॥ षष्ठ्यां कपिलाषष्ठ्यां ॥ पिंडांते श्राद्धसमाप्त्यर्थः ॥ दर्शश्राद्धांगतर्पणस्य श्राद्धात्पूर्वं विहि
तत्वात् नित्यतर्पणेनैव प्रसंगात्सिद्धिः ॥ पित्र्ये दैवार्षिके तु नित्यतर्पणं तिलवर्ज्यं करणीयं ॥ सप्तम्यां भानुवारे वै
रेव भानौ पित्रोर्मृतेहनि ॥ तिलैर्यस्तर्पणं कुर्यात्स भवेत्पितृघातकः इति वृद्धमनूक्तेः ॥ नैव श्राद्धदिने कुर्यात्ति
लैस्तु पितृतर्पणं इति संग्रहवचनाच्च ॥ तीर्थश्राद्धे विशेषाभावाद्दर्शवत्तर्पणं ज्ञेयं ॥ तद्विधिः संग्रहे ॥ स्नात्वा
तीरं समागत्य उपविश्य कुशासने ॥ संतर्पयेत्पितॄन्सर्वान् स्नात्वा वस्त्रं च धारयेत् ॥ अपसव्यं ततः कृत्वा स
व्यं जान्वाच्य भूतले ॥ नामगोत्रं स्वधाकारैर्द्वितीयांतेन तर्पयेत् ॥ बृहन्नारदीये ॥ वृद्धिश्राद्धे सपिंडे च
प्रेतश्राद्धे तु मासिके ॥ संवत्सरविमोके च न कुर्यात्तिलतर्पणं ॥ श्राद्धांगमित्यर्थः ॥ ॥ अथ नित्यतर्पणे

श्रा०चं० कालविशेषः॥ गार्ग्यः॥ भानौभौमेत्रयोदश्यांनंदाभृगुमघासुच॥ पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणं॥ स्म
४० त्यर्थसारेपि॥ विवाहव्रतचूडासुवर्षमर्द्धंतदर्धकं॥ उत्तरार्द्धंतदेव॥ स्मृतिचंद्रिकायांमरीचिः॥ गृहेजन्मादि
नेतथा॥ मृत्यपुत्रकलत्रार्थीत्रोनकुर्यात्तिलतर्पणं॥ तत्रैवपुराणे॥ पक्षयोरुभयोराजसप्तम्यांनिशिसंध्ययोः॥
विद्यापुत्रकलत्रार्थीतिलान्पंचसुवर्जयेत्॥ अत्रमतिप्रसवः॥ क्वचिद्दुर्गः॥ कृष्णेभाद्रपदेमासिश्राद्धं
प्रतिदिनंभवेत्॥ पितृर्णांप्रत्यहंकार्यंनिषिद्धेहेविवर्जयेत्॥ पृथ्वीचंद्रोदये॥ तीर्थेतिथिविशेषेचगं
गायांप्रेतपक्षके॥ निषिद्धेपिदिनेकुर्यात्तर्पणंतिलमिश्रितं॥ स्मृत्यर्थसारेपि॥ तिथितीर्थविशेषेषुकार्यं
प्रेतेचसर्वदेति॥ कात्यायनः॥ उपरागेपितुःश्राद्धेपातेमातायांचसंक्रमे॥ निषिद्धेपिहिसर्वत्रतिलैस्तर्पण
माचरेदिति॥ यत्रतिलालाभस्तत्रसुवर्णाद्यन्वितंतर्पणंकार्यमित्याहस्मृतिचंद्रिकायांयोगयाज्ञवल्क्यः॥
तिलानामप्यलाभेतुसुवर्णरजतान्वितं॥ तदभावेनिषिंचेत्तुदर्भमात्रेणवापुनरिति॥ पतितपितुस्तुश्राद्धत ४०

र्पणादिनास्त्येव॥ वृद्धोतीर्थेचसंन्यस्तेतातेचपतितेसति॥ येभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतः॥ इतिषड्त्रिं
शन्मतात्॥ संन्यस्तेजीवतीत्यर्थः॥ मृतेसंन्यस्तेतत्रभस्येवकार्यं॥ ॥ अथक्षयाहाज्ञानेनिर्णयः॥ बृहस्पतिः॥ नज्ञा
यतेमृताहश्चेत्प्रमीतेप्रोषितेसति॥ मासश्चेत्प्रविज्ञातस्तद्दर्शेस्यान्मृतेहनि॥ ज्ञातमासस्यएवदर्शोमृताहइत्यर्थः॥ काला
न्तरमाहमरीचिः॥ श्राद्धविघ्नेसमुत्पन्नेअविज्ञातेमृतेहनि॥ एकादश्यांतुकर्तव्यंकृष्णपक्षेविशेषतः॥ विशे
षतइत्युक्त्याशुक्लपक्षेपिकार्यमितिहेमाद्रिः॥ ममतुप्रतिभातिविशेषतइतिकथनात्कृष्णैकादश्यामेवक
र्तव्यं॥ श्राद्धकर्मणिकृष्णपक्षप्राशस्त्यात्॥ तथाचपराशरः॥ देशांतरगतोविप्रःप्रवासात्कालकारिकात्॥
देहनाशमनुप्राप्तस्तिथिर्नज्ञायतेयदि॥ कृष्णाष्टम्यष्टमावास्याकृष्णेचैकादशीचया॥ उदकंपिंडदानंचतत्रश्राद्धं
चकारयेत्॥ दिनमासयोरज्ञानेतुभविष्यपुराणे॥ दिनमेवनजानातिमासंवापिकदाचन॥ कार्यंतेनत्वमायांतुश्रा
द्धंमाघेथमार्गकेइति॥ य हादिनमेवजानातिनमासंतदाषाढोमाघोवाग्राह्यः॥ यदामासोनविज्ञातोविज्ञातंदिनमे

श्रा०चं०॥ वतु॥ नष्टस्याषाढके मासि माघे वा न द्दिनं भवेदिति बृहस्पतिवचनात्॥ यदा देशांतरमृतस्य पुंसो मरणदिनमासौ न विजानाति किं
४१ तु प्रस्थानदिनमासौ जानाति तदा तावेव ग्राह्यौ॥ दिनमासौ न विज्ञौ मरणस्य यदा पुनः॥ प्रस्थानदिनमासौ तु ग्राह्यौ पूर्वो
स्म क्तया विशेदिति बृहस्पत्युक्तेः॥ अत्राप्यन्यतरो रणे पूर्ववन्निर्णयः॥ प्रस्थानिकदिनमासाज्ञाने तु भविष्ये॥ मृतवार्ता
श्रुते ग्राह्यौ तौ पूर्वोक्तक्रमेण विति॥ अज्ञातमरणस्याक्रियाकालमाह जातूकर्ण्यः॥ पितरि प्रोषिते यस्य न वार्ता
नैव चागतिः॥ ऊर्ध्वं पंचदशाद्वर्षात्कुर्यात्तत्प्रतिरूपकं॥ कुर्यात्तस्य च संस्कारं यथोक्तविधिना ततः॥ तदादीन्येव
सर्वाणि प्रेतकार्याणि संचरेत्त्विति॥ अत्र प्रोषित इत्येवं विवक्षितं॥ अनुवाद्यविशेषणत्वात्पितरीति न द्विशेष
णमविवक्षितं॥ तेन पित्रातिरिक्तानां संग्रहः॥ बृहस्पतिस्तु॥ यस्य न श्रूयते वार्ता यावद्द्वादशवत्सरं॥ कु
शपुत्रप्रदानेन तस्य स्यादवधारणमिति॥ पक्षांतरमाह॥ प्रेतक्रियोत्तरमागतस्य विशेषमाह वृद्धमनुः॥
प्रोषितस्य यदा कालो गतश्चेद्द्वादशाब्दिकः॥ प्राप्ते त्रयोदशे वर्षे प्रेतकार्याणि कारयेत्॥ जीवन्यदि स आगच्छेद्घृत ४१

ग

कुंभे निधाय नयेत्॥ वृद्धस्त्वा प्रायश्चित्तं तु जातकर्मादि कारयेत्॥ द्वादशाहं व्रतं चर्यं त्रिरात्रमथवास्य तु॥ स्नात्वोद्वहेत तां भार्यामन्यां वा तद
भावतः॥ अग्नीनाधाय विधिवद्व्रात्यस्तोमेन वा यजेत्॥ अथैंद्राग्नेन पशुना गिरिं गत्वाथ वा यजेत्॥ इष्टिमायुष्मतीं कुर्यादीप्सि
तांश्च क्रतूंस्तथेति॥ सर्वं शिवं॥ ॥ अथ श्राद्धविघ्ननिर्णयः॥ तत्र क्षणदानोत्तरं ब्राह्मणस्य शावाशौचं सूताशौचं वा प
तेन त्वाल्लीस्तुर्य्यं प्राप्ते॥ निमंत्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि॥ निमंत्रणाद्धि विप्रस्य स्वाध्यायादिरतस्य
विरपु० च॥ देहे पितृषु नाशौचं विध्यते च कदाचनेति॥ कर्तुस्तु विष्णुराह॥ व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे॥
प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकमिति॥ प्रारंभस्तेन विधुक्तः॥ प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्र
योः॥ नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रियेति॥ अत्र प्रासंगिकं किंचिल्लिख्यते॥ अत्र यद्यपि सामा
न्यतो यज्ञे स मंत्रकर्तृत्विग्वरणरूपप्रारंभत एव यजमानस्याशौचाभावः प्रतीयते तथापि सद्दीक्षणीयेष्ट्या
संस्कृतस्यैव तस्य बोध्यः॥ सूतकं तस्यादिस्तु पक्रम्य नदीक्षिण्याः परं यज्ञेन कृच्छ्रादिन यश्च

श्रा॰च॰ रंनिति घ्नं रोगपरिक्लिष्टान् ॥ न दुष्टहीनदीक्षस्य त्रैविद्यस्य महामखे ॥ स्नानं त्ववभृथे यावत् तावत्तस्य न सूतकमिति ब्र
ह्मपुराणात् ॥ अथावभृथस्नानादर्वाक् ॥ एवं चाद्याधाने ष्टि पशुबंध चातुर्मास्यादौ दीक्षिणी या यूपभाजो यजमान
ने स्य प्रधानसंकल्पोत्तरमाशौचापाते स्यैवाशौचं ॥ याज्ञवल्क्यः ॥ ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वतां ॥ सत्रिव्रतिब्रह्म
चारिदातृब्रह्मविदां तथा ॥ दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ॥ आपद्यपि च कष्टायां सद्यः शौचं विधीयत इति
॥ ऋत्विजां मधुपर्कोत्तरमेव सद्यः शुद्धिः ॥ गृहीतमधुपर्कस्य यजमानात्तु ऋत्विजः ॥ पश्चादशौचे पतिते न भवे
दिति निश्चय इति ब्राह्मात् ॥ अत एव नामांडारश्च वृतुर्णां वरणपक्षे न्येषामाशौचेन्युत्थागमयितव्या इत्याह प्राय
श्चित्ते ॥ एवं स्मार्ते पितृत्वात् क्रोधिहि होमोत्सर्गादौ मधुपर्कसत्वे ऋत्विजां दोषाभावो ज्ञेयः ॥ अत्र सर्वत्र ऋत्विग्वृद्धि दी
तानां तु सत्यप्याशौचाभावे श्रौतकर्मणि तत्कालः स्नानः शुद्धिं मन्युयादिति वचनाद्व्रत्येव स्नानं ॥ व्रतशब्देन प्रा
यश्चित्तार्थत्वेन नान्यथानुष्ठीयमानं द्वादशाद्भव्रतं वा सकृच्छ्रचांद्रायणादि श्राद्धव्रतसंस्कारकर्ममात्रग्रहणं ॥ विवा राम
हे सद्यः शुद्धिः केषामित्यपेक्षायां ब्रह्मपुराणे ॥ दातुः प्रतिगृहीतुश्च कन्यादाने च नो भवेत् ॥ विवाह यिच्छोः कन्या ४२
फ सत्रपदेन मुख्यमेव सत्रं गृह्यते ॥ तत्र वर्णारंभावात् ॥ नांदीमुखं नांदीश्राद्धं ॥ आदिनांदी ५२

पाल्याजाहोमादिकर्मणि इति ॥ दातृप्रतिगृहीत्रग्रहणं उपनयनादिषु संस्कार्यसंस्कारयोरुपलक्षणं ज्ञेयं ॥ अत्र सर्वत्र सांग एव तत्कर्मण्या
शौचाभावो बोध्यः ॥ दानजपहोमार्चनारयत्नु व्रतशब्देनैव संगृहीताः ॥ पाकपरिक्रियापाकारंभः ॥ प्रांसे ॥ गृहीतनियमस्यापि न स्या
दन्यस्य कस्यचित्तदिति ॥ योगी ॥ दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ॥ आपद्यपि च कष्टायां सद्यः शौचं विधीयते ॥ दाने संतता
न दाने ॥ विष्णुः ॥ आशौचं न राज्ञां राजकर्मणि न व्रतिनां व्रते न सत्रिणां सत्रेण कारूणां कारुकर्मणि न राजाज्ञाकारिणां तदिच्छ
या न देवप्रतिष्ठाविवाहयोः पूर्वसंभृतयोरिति ॥ प्रचेताः ॥ कारवः शिल्पिनो वैद्या दासीदासास्तथैव च ॥ राजानो राजभृत्याश्च
सद्यः शौचाः प्रकीर्तिताः ॥ पैठीनसिः ॥ विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि ॥ न तत्र सूतकं तद्वत्कर्म यज्ञादि कारयेत् ॥
वैरिवेष्टितदुर्गसंरक्षणार्था यज्ञा दुर्गयज्ञाः शांतिकोच्चाटनादयः ॥ यात्रायां प्रारब्धायां ॥ तीर्थकर्मणि आकस्मिकतीर्थप्राप्तौ ॥
अत्र च नरपत्यादिवैद्यादासीदासानां चोत्सवे शौचसंकोचस्तत्कार्ये आपदि च बोध्यः ॥ स्वस्थकाले त्विदं सर्वं सूतकं परिकीर्तितं ॥ आपद्गतस्य
सर्वस्य सूतकेपि न सूतकमिति दक्षोक्तेः ॥ दातृगृहे मरणादौ हेमाद्रौ ब्राह्मे ॥ भोजयित्वा तु संभुक्ते विप्रे दत्तं तु विपद्यते ॥ गृह इति
शेषः ॥ यदा कश्चित्तदोच्छिष्टं शोधयेत्सहसा समाहिताः ॥ आचम्य परकीयेन जलेन शुचयो द्विजा इति ॥ ॥ अथाशौचेन श्राद्धप्र
तिबंधे पराशराशीयेकाल्पसंभंगः ॥ देये पितॄणां श्राद्धे तु आशौचं जायते यदि ॥ आशौचे तु व्यतिक्रान्ते तेभ्यः श्राद्धं प्रदीयत इति ॥

श्राद्धचं० आशौचांत्यदिनोत्तरदिन एकादशाहमित्यर्थः ॥ तत्राप्यंतरिते कालो हेमाद्रौ षट्त्रिंशन्मते ॥ मासिके चाब्दिके चैव ह्यसंप्राप्ते मृतसूतके ॥ वदंति शुद्धौ तत्कार्यं दर्शे वापि वि
चक्षणाः ॥ मरीचिः ॥ श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेऽहनि ॥ एकादश्यां तु कर्तव्यं कृष्णपक्षे विशेषतः ॥ अंगिराः ॥ तदहश्चेत्प्रदुष्येत केनचित्सूतकादि
४३ न ना ॥ सूतकानंतरं कार्यं पुनस्तदहरेव वा ॥ विवेके कारणात्तु पुनस्तदहरेव वेदं मासिकं परमित्याहुः ॥ यद्यप्याशौचांतो मलमासोपनतस्तर्हि तत्राप्यंतरित
श्राद्धं कार्यं ॥ प्रतिसंवत्सरं श्राद्धमाशौचात्पतितं च यत् ॥ मलमासेऽपि तत्कार्यमिति भागुरिभाषितमिति भृगुवचनात् ॥ चकारस्त्वर्थे ॥ रोगादिना प्रतिबंधे तु मृता
अथ ह एवानेन पुत्रादिना श्राद्धं कारणीयं ॥ पूर्वलिखितवचनात् ॥ ॥ भार्यारजोदर्शनेन तत्पाकासंभवे दर्शादिश्राद्धमामेनैव कार्यं ॥ ॥ श्राद्धविघ्ने द्वि
जातीनामामश्राद्धं प्रकीर्तितं ॥ अमावास्यादिनियतं माससंवत्सरादृत इति हारीतवचनात् ॥ श्राद्धविघ्ने पत्नीरजोदर्शनरूपे श्राद्धविघ्ने ॥ त
था ह पराशरीये उशनाः ॥ अपत्नीकः प्रवासी च यस्य भार्या रजस्वला ॥ सिद्धान्नेन न कुर्वीत आमं तस्य विधीयत इति ॥ कात्यायनोऽपि ॥ आपद्यनग्नौ तीर्थे च
प्रवासे पुत्रजन्मनि ॥ आमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वलेति ॥ व्याघ्रपादोऽपि ॥ आर्तवे देशकालानां विप्लवे समुपस्थिते ॥ आमश्राद्धं द्विजैः कार्यं शूद्रः कुर्यात्स
दैव हि ॥ कालादर्शे तु पत्नीरजोदर्शने श्राद्धं पंचमदिने कार्यमिति पक्षांतरमुक्तं ॥ तेन नियतपदग्रहणं ॥ आब्दिके पत्न्यां रजस्वलायां सत्यामपि
तद्दिन एव कार्यं ॥ उष्पवत्सपिंडादेरपि विदेशस्थोऽप्यनग्निकः ॥ अन्नेनैवाब्दिकं कुर्याद्धेम्ना वामेन न क्वचिदिति पाराशरीये लौगाक्षिस्मृ
तेः ॥ मरीचिरपि ॥ अनग्निकः प्रवासी च यस्य भार्या रजस्वला ॥ आमश्राद्धं द्विजः कुर्यान्न तत्कुर्यान्मृतेऽहनीति ॥
रजोदोषे सत्यपि तदामश्राद्धं मृतेऽहनि न कुर्यात् किंतु पक्वान्नेनैव कुर्यादित्यर्थः ॥ तथा च ॥ तिथिच्छे ४३

दो न कर्तव्यो विनाशौचं यदृच्छया ॥ पिंडश्राद्धं च दातव्यं विच्छित्तिं नैव कारयेत् इति ऋष्यशृंगवचोऽपि
मंजुलं संगच्छते ॥ यत्तु हेमाद्रिपरिधृतं वचनं ॥ मृतेऽहनि तु संप्राप्ते यस्य भार्या रजस्वला ॥
श्राद्धं तत्र न कर्तव्यं कर्तव्यं पंचमेऽहनि इति तत्पुत्रस्वीकर्तृकश्राद्धविषयं ॥ तथा च
यस्य भार्या रजस्वला तस्यायमर्थः ॥ यस्य मृतस्य श्राद्धकर्तृभार्या रजस्वलेति ॥ तथा
च श्लोकगौतमः ॥ अपुत्रा तु यदा भार्या संप्राप्ते भर्तुराब्दिके ॥ रजस्वला भवेत्सा
तु तत्कुर्यात्पंचमेऽहनीति पराशरीये प्रभासखंडेऽपि ॥ शुद्धा स्यात्तु चतुर्थेऽह्नि
स्नाता नारी रजस्वला ॥ दैवे कर्मणि पित्र्ये च पंचमेऽहनि शुध्यतीति ॥ अ
सावेव पक्षः कालादर्शपराशरमाधवप्रयोगपारिजातविवेचनकारसिंधुका

श्रा० चं० ग्रादीनां संमतः ॥ हेमाद्रिस्तु पाणिग्रहणाद्धि सहत्वं कर्मस्विति वचनेन भार्याया अपि श्राद्धे सहाधिकारात्तस्यां
४४ च रजस्वलायां अशुचित्वेनानधिकारे व्यासज्यवृत्तेर्भर्तृगतस्याप्यधिकारस्यैवाभावात् पंचमदिन एव श्राद्धं वि
पुत्रस्य श्राद्धकर्तुरित्येवार्थो मृताहनीति वचनस्य पुष्पवत्स्वपीति वचनानि सहाधिकृतभार्यांतरसद्भाव
विषयाणीत्याह तन्न मेदं जायापती अग्निमादधीयातामित्यादिनाऽधाने सहाधिकाराधानसिद्धावग्नि
साध्यकर्मस्वपि सहाधिकारसिद्धेः पाणिग्रहणाद्धीति वचनप्रवृत्तस्य सहाधिकारस्योभयसंयो
गेनोत्संनश्रौतस्मार्ताग्निसाध्यकर्मस्वेव न्याय्यत्वात् ॥ श्राद्धकर्मणो निरग्नीनामपि अधिकारात् श्राद्धकर्म
णः पत्नीसाध्यकर्मघटितत्वाभावात् ॥ तस्मादेव भार्यः साग्निकोपि तस्यां रजोवत्यां अनेनैवाब्दिकमासिक
श्राद्धानि कुर्यात् ॥ श्राद्धकर्त्री स्त्री रजस्वला तदाब्दिकं मासिकं च पंचमदिनादौ कुर्यात् मासादिनिमित्तं तु तस्या
लुप्यत एवेति ॥ श्रीमातामहगुरवस्तु हेमाद्र्यनुसारेण मृतेहनीति वचनात्कर्तुर्भार्यायां रजस्वलायां सत्यां
पंचमदिन एव क्षयाहश्राद्धं कार्यं ॥ पुष्पवत्स्वपि दारेष्वित्यादीनि वचनानि तत्सरण्ये वेत्याहुः ॥ मतद्वयं प्रमाण ४४
त्वाल्लोके त्वाद्रियतेधुना ॥ विस्तरस्तत्र निर्दिष्टो नोस्माभिर्मैत्रगौरवात् ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अथान्वारूढायाः क्षयाहनिर्णयः ॥ ॥ यदि पत्नी पत्या सहैक[illegible]तिथौ वान्वारूढा तर्हि क्षयाहश्राद्धे विश्वेदेवपाकादितं
त्राः ब्राह्मणः पिंडाश्च भिन्नं इत्यसंध्याय एव ॥ एकचितिं समारूढो म्रियते दंपती यदि तंत्रेण श्रपणं कृत्वा पृथक् पिंडं स
माचरेदिति मदनरत्नधृतप्रचेतोवचनात् ॥ मृतेहनि समासेन पिंडनिर्वपणं पृथक् ॥ नवश्राद्धं च दंपत्योरन्वारोहण ए
वतु ॥ इति पाराशरीये लौगाक्षिवचनात् ॥ समासेन तंत्रेण श्रपणमित्यर्थः ॥ पिंडदानं पृथगसपत्नीक ॥ नवश्राद्धमपि
तद्वदेव कुर्यात् ॥ गार्ग्योपि ॥ एकचितिं समारूढौ दंपती निधनं गतौ ॥ पृथक् श्राद्धं तयोः कुर्यादोदनं च पृथक् पृथ
गिति ॥ श्राद्धशब्दो ब्राह्मणभोजनपरः ॥ ओदनशब्दः पिंडपरस्तेन विश्वेदेवादीनां हविरादुपकारिणां तंत्रता ब्राह्मणभो
जनपिंडदानयोरतंत्रतेति सिद्धं ॥ यत्तु भृगुवचनं ॥ या समारोहणं कुर्याद्भर्तृश्चितिं सा पतिव्रता ॥ तां मृताहनि संप्राप्ते पृथ
क् पिंडे नियोजयेत् ॥ प्रसंगवचनवत् श्राद्धं युगपत्तु समापयेदिति ॥ तदपि स्पष्टार्थं तया पृथक् पिंडदानपरमेव ॥
एतेन दर्शे पार्वणं षिकमेकोद्दिष्टमुक्तं तद्विषयमिति केषांचिदुक्तिः परास्ता ॥ यदा तिथ्यंतरे न्वारूढा तदा तत्तिथौ भि ढ
न्नमेव क्षयाहश्राद्धं कर्तव्यमिति सर्वनिबंधकारसमतः सिद्धोर्थः ॥ दाक्षिणात्यास्तु ॥ तिथिभेदेपि भर्तृतिथावेव विश्वे
देवपाकास्तदुपयोगिकाः तंत्रेण द्वयोरपि श्राद्धं समाचरंति ॥ तत्र एकचितिं समारूढौ दंपती प्रमृतौ यदि ॥ पृथक्

श्रा·चं· ४५

श्राद्धं प्रकुर्वीत पत्नूरेवक्षये हनि ॥ मृतानामपि भूयानां भार्याणां पतिना सह ॥ तंत्रेण श्रपणं कृत्वा श्राद्धं स्वाभिक्ष
येह नीति ॥ चन्द्रिकोमकाशोत्क्ति विवतवचनमिदं भार्या निर्मूलकंपश्याम: ॥ ननुभिन्न तिथौ समन्वा रूढायाः के
षांचित् चितिसमारूढत्वमिति चेदृणु ॥ चितिशब्दा यूपादिशब्दवद् दृष्टा दृष्टसमुदाय वाची ॥ तेन देशांतरका
लांतरे वा मंत्रक दाहेपि संस्काराभावे नास्त्येव पाकाशादि प्रकृति दाहकाकृचिन्निमेद्दाभाव: ॥ इतरथा सार्व
जानिनोनुगमनरूपो आचारो व्याहन्येत ॥ तस्माद्दयमेवार्थोयुक्तः अवस्था पितन्वेवमेवमू कृत्प्रकारांतरेण ह्सा निर्ण
येऽस्मन्मातुः पिनामहच्चरणैः ॥ तेषां सिद्धांतकारिकापि ॥ एकस्यामपसिनायां तिथौ कालांतरेपि वा ॥ अन्वारूढज
नन्यास्तत्संस्या श्राद्धपिचवार्षिकं ॥ पार्वणेन विधानेन विश्वेदेवादितंत्रतः ॥ पिंडब्राह्मणभेदेन समास विधितो भवेत् ॥ मा
सिकादिष्वेवमेवन्यायतोनुष्ठितिर्मता ॥ अपवादां नवश्राद्धे पृथक्पृथगनुष्ठितः ॥ तत्राप्यसंभवं तंत्रेवार्षिकादिषु वा
चरेदिति ॥ ग्रंथगौरवभीतेरिह विस्तृतिर्न प्रदर्शिता ॥ पश्यंतु तां पुनर्द्वैत निर्णयादिषु भावतः ॥ विस्तृतौ मोह प्रा
प्नोति जनशास्त्रकृतः श्रमः ॥ अतोत्र विषयान्वच्मि संक्षेपेणाखिलानह ॥ ॥ अथ श्राद्धसंपाते निर्णयः ॥ प्र ४५
दर्श्यते ॥ पराशरीये भृगुः ॥ एककाले गतासूनां बहूनामथवा द्वयोः ॥ तंत्रेण श्रपणं कुर्याच्छ्रा[ ]द्धं यात्पृथक्पृथक् ॥

कु

पूर्वकस्य मृतस्यादौ द्वितीयस्य ततः परं ॥ तृतीयस्य ततः कुर्यात्संनिपातेष्वयं क्रम इति ॥ एककाले एकतिथौ ॥
अत्रिपरि ॥ बहूनामथवा द्वाभ्यां श्राद्धं चेत्स्यात्समेहनि ॥ तंत्रेण श्रपणं कृत्वा श्राद्धं कुर्यात्पृथक्पृथगिति ॥ द्व
याविसर्ग द्वाभ्यां मित्यार्षं ॥ इदं च तंत्रेण श्रपणं पृथक्पाकासामर्थ्ये इति केचित् ॥ अत्रैव ॥ पित्रोः श्राद्धे समं प्राप्तेन
वेद्युर्पितृमिता ॥ पर्यूषिते चिरंतने ॥ पितृपूर्वं सुतः कुर्याद् दन्यत्रा संनिया गत इति ॥ कालादर्श निबंधनात्समत्यर्थसार पराशर माधव
मदनपारिजातकालादर्शादयो विशेषेण पूर्वं पितुः क्षयाह श्राद्धं ततो मातुरित्याहुः ॥ हेमाद्रिस्तु मरणपूर्वापर्य ज्ञाने पितृपूर्वकमित्या
ह ॥ कृष्णभट्ट ॥ भवेच्च दिसपिंडानां युग[redacted]पन्मरणं तदा ॥ संबंधासन्निमाकाच्यतक्रमाच्छ्राद्धमाचरेदिति पार्वणैकोद्दिष्टयो
र्युगपत्संकावाह जाबालिः ॥ यद्येकत्र भवेयातामेकोद्दिष्टं च पार्वणं ॥ पार्वणं त्वभिनिर्वर्त्य एकोद्दिष्टं समाचरेत् ॥ अत्रैकोद्दि
ष्टमभिनिर्वर्त्य पार्वणं समाचरेदित्यन्वयः ॥ एकोद्दिष्टस्य पार्वणात्प्राक्कालिकत्वबोधात् ॥ एवं दर्शक्षयाह प्रासौ आश्वला
यनः ॥ यन्मास्येवाब्दिके श्राद्धं यस्य पित्रोर्भवेदिह ॥ प्राक्पिंडदानात्तन्मासि पार्वणं न समाचरेदिति ॥ मास्यमावास्यायां ॥

श्रा

पार्वणं दर्शश्राद्धं ॥ तथा च वार्षिकात्प्राक् दर्शश्राद्धं न कार्यमित्यर्थः ॥ अत्र यद्यपि नैक[ ]द्धद्वयं कुर्यात्समासेहनि कुत्रचिदि
ति प्रचेतो वचनाच्छ्राद्धद्वयमेकस्यैकाहनि निषिद्धं तदनिमित्तकं संनिमित्तान्यनेकान्यपि संप्रकार्याणि इति ॥ तदुक्तं जा
बालिकात्यायनाभ्यां ॥ श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न तद्दिने ॥ नैमित्तिकं तु कर्तव्यं निमित्तानुक्रमोदयं ॥ द्वेबहूनि

श्रा॰ चं॰ निमित्तानि जायेरंनेकवासरे ॥ नैमित्तिकानि कार्याणि निमित्ते सत्यनुक्रमादिति ॥ तेन नानानिमित्तान्यनेकश्राद्धानि कु
४६ र्वतां न दोषः ॥ दर्शे चेत्सिवृक्षयाह स्तदाक्षयाह प्रयुक्तश्राद्धं कृत्वा दार्शिकार्यं तदपि सपाप्य ग्रहणं चेत्तन्निमित्तकमपि भो क्र
भावे आमादिना कृत्वा पुत्रजन्मयदिस्यात्तं निमित्तमपि कुर्वीत ॥ एवं तीर्थविशेषेषु तत्तीर्थफलावापयेनानाश्राद्धानि कार्या
णि ॥ अनेकोद्देश्यकानां श्राद्धानामेकोद्देश्यकानेकश्राद्धानां च काले कर्तव्यतन्त्रानुष्ठान ॥ यथा दर्शादौ पितृश्राद्धं मातामह
श्राद्धं यो र्व्यतीपातसंक्रान्तिश्राद्धयोश्च ॥ एकदेवताकयोः काम्यनित्यश्राद्धयोः संनिपाते काम्येन नित्यश्राद्धसिद्धिः ॥ तदुक्तं
पाराशरीये स्मृतिसंग्रहे ॥ काम्यतन्त्रेण नित्य[illegible]स्यतन्त्रं श्राद्धस्यापि सिध्यतीति ॥ दैवतैक्ये क्वचिदेकनिमित्तकानुष्ठानेनाप्य
न्यनिमित्तकस्य प्रसंगसिद्धिर्भवतीत्युक्तं ॥ कालादर्शे ॥ नित्यदार्शिकयोश्चोदकुंभमासिकयोरपि ॥ दार्शिकस्य युगादे
श्च दार्शिकालभ्ययोगयोः ॥ दार्शिकस्य च मन्वादेः संपाते श्राद्धकर्मणः ॥ प्रसंगादितरस्यापि सिद्धेरुत्तरमाचरेत् ॥ देवताभे
देतु श्राद्धद्वयं कार्यमित्युक्तं तत्रैव ॥ नित्यस्य चोदकुंभस्य नित्यमासिकयोरपि ॥ दर्शस्य चोदकुंभस्य दार्शमासिकयोरपि ॥
नित्यस्य चाब्दिकस्यापि दार्शिकाब्दिकयोरपि ॥ युगाद्याब्दिकयोश्चैवमन्वाद्याब्दिकयोस्तथा ॥ प्रत्याब्दिकस्य चालभ्य
योगेषु विहितस्य च ॥ संपाते देवताभेदाच्छ्राद्धयुग्मं समाचरेत् ॥ ॥ अथ सपिंडीकरणं ॥ तच्च सिद्धान्ते नैव कार्यं ॥ न
त्वमादिना ॥ सपिंडीकरणं सर्वथा नैव कार्यमिति स्मृत्यर्थसारात् ॥ तत्कालमाह विष्णुधर्मोत्तरे मार्कंडेयः ॥ कृते सपिं ४६

डीकरणे नरः संवत्सरात्परं ॥ प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यत इति ॥ भोगदेहः पितृदेहः ॥ एकादशे द्वादशे ह्नि त्रिपक्षे वा
त्रिमासि वा ॥ षष्ठे चैकादशे चाब्दे संपूर्णे वा शुभागमे इत्यादि वचनैस्तस्यैकादशाहद्वादशाहतृतीयपक्षतृतीयमासषष्ठ
मासएकादशमाससंवत्सरान्तशुभागमा इत्यष्टौ कालाः सामान्यतः कथिताः ॥ नवमे मासि पिकेन चिन्मतेन कालोक्तेनापदिश्
पैतृ न सिना ॥ वत्सरान्ते विसर्जनं नवमे मास्यामित्येके ॥ विसर्जनं प्रेतत्वविसर्जनं ॥ सपिंडीकरणमिति यावत् ॥ तत्र यद्यवस्था ॥
हारीतः ॥ यानुपूर्वा मिममावास्यामृताहाद्द्वादशीं भवेत् ॥ सपिंडीकरणं तस्यां कुर्यादेव सुतोग्निमान् ॥ मृताहाद्दशमी यातिथि
स्तत्र या ममावास्यायामित्यर्थः ॥ अत एव कार्ष्णाजिनिः ॥ सपिंडीकरणं कुर्यात्सूर्येचन्द्रोग्निमान्सुतः ॥ परतो दशरात्राच्चेत्कुहूरद्ध्वा
परीत इति ॥ जाबालोपि ॥ सपिंडीकरणं कुर्यात्पूर्वे दर्शेग्निमान्सुतः ॥ परतो दशरात्रस्य पूर्वी तद्वत्परेतर इति ॥ इयं चैका ए
दशाह्नि दर्शागमे ज्ञेयं ॥ आहिताग्नेः ॥ सपिंडीकरणाद्धे त्वे पैतृकं पदमास्थिते ॥ आहिताग्नेः सिनीवाल्यां पितृयज्ञः
प्रवर्तत इति गालववचनात्सपिंडीकरणमन्तरेण पिंडपितृयज्ञस्य कर्तुमशक्यत्वात्मृतपितृकस्य तदकरणे प्रत्यवायात् ॥
तथा च जाबालिः ॥ नासपिंड्याग्निमान्पुत्रः पितृयज्ञं समाचरेत् ॥ पापी भवेत्स कुर्वन्हि पितृहा चोपजायत इति ॥
दर्शानागमे तु द्वादशाहो मुख्यः कालः ॥ भविष्यत्पुराणे ॥ यजमानोग्निमान्राजन्प्रेतश्चानग्निको भवेत् ॥
द्वादशाहे भवेत्कार्यं सपिंडीकरणं सुतैरिति ॥ गोभिलोपि ॥ साग्निकस्य यदा कर्ता प्रेतश्चानग्निमान्भवेत् ॥
उत्तरार्धं तद्वत् ॥ प्रतिबंधेन तत्रोत्तरितेकालमाह ॥ कात्यायनः ॥ एकादशाहं निर्वर्त्य पूर्वे दर्शाद्यथाविधि ॥ प्रकु

वीरैनाग्निमान्विप्रो मातापित्रोः सपिंडतामिति ।। दर्शो सर्वे यस्मिन्कस्मिन्दिन इत्यर्थः ।। तत्रायनं रिते पिपक्षादिषूत्तरकालेषु
६७ कर्तव्यं ।। तदाह साग्निकमधिकृत्य गोभिलः ।। द्वादशाहादिकालेषु प्रमादादननुष्ठितं ।। सपिंडीकरणं कुर्यात्कालेषूत्तरभा
विष्विति ।। एवं चैपासनाग्निमतः पिंडपितृयज्ञानुरोधेनैतेषु सपिंडीकरणं नकिंतु दशाह मध्यवर्ति वा सिंडपितृयज्ञो कु
र्यते ।। अत्र भविष्यपुराण गोभिलकात्यायनवचनेषु मृते मातापित्रोरिति श्रवणाज्जनकपित्र्यतिरिक्तस्य सपिंडीकरणे
प्राप्ते साग्नेः कर्तुर्न द्वादशाहदर्शप्राक्तनयत् किंचिद्दिननियमः ।। एवमपुत्राहिताग्नेः पत्नीचकर्त्री पुत्रायास्तस्याः पतिः
कर्ता तदापि नासौ नियमो नापि त्रिपक्षनियमः ।। किंतु नियम एव नानाहिताग्नेरेव ।। प्रेतस्यैव साग्निहे तृतीयपक्षे कार्यं ।। प्रेत
श्चेदाहिताग्निः स्यात्कर्ता नग्निर्यदा भवेत् ।। सपिंडीकरणं तस्य कुर्यात्पक्षे तृतीयक इति सुमंतुवाक्यात् ।। अत्राहिताग्नि
रिति बहुव्रीहिणा साग्निकः परोक्तः पुत्र एव प्रसमिज्ञायते ।। लघुहारीतोपि ।। अनग्निकस्तु यदा वीरभवेद् यीन दाग
हौ ।। प्रेतश्चेदग्निमांस्तु स्यात्त्रिपक्षे वै सपिंडनमिति ।। अत्राधिकरण सप्तमी वशात्सम स्तत्तृतीय पक्षस्तत्कालः ।।
एवं त्रिमासषण्मासादिष्वपि ।। अत्र श्रीमातामहास्तु यदा दंपत्योरन्यतरस्य पूर्वं मरणे नाग्नयो विनियुक्तास्तदेत एम
रस्य साग्निता भावात्कालांतरे तन्मरणे तु न त्रिपक्षनियमः ।। उत्सृष्टाग्नेरप्येवं ।। विधिंनाग्नेस्तु आप्त्येग्निसद्भा ६७

वात्तस्य साग्नित्वेन त्रिपक्ष एवेत्याहुः ।। उभयोः साग्नित्वे द्वादशाह एव ।। साग्निकस्तु यदा कर्ता प्रेतश्चाप्यग्निमान्भवेत् ।।
द्वादशाहे तदा कार्यं सपिंडीकरणं पितुरिति विज्ञानेश्वरमाधवोदाहृतसुमंतूक्तेः ।। हेमाद्रिकालादर्शयोर्नैतद्वचनं ।।
तेन तन्मते पितुरपि साग्निकस्यापि सपिंडीकरणप्राप्ते साग्निकस्यापि पुत्रस्य न द्वादशाह कर्तव्यता नियमः ।। किंत्वनि
८ यम एव ।। पूर्वयोर्मते नियमः ।। वचनसद्भावात् ।। द्वयोरप्यनग्निकत्वे तु भविष्ये ।। सपिंडीकरणं कुर्याद्यजमानस्त्वन
ग्निमान् ।। अनाहिताग्नेः प्रेतस्य पूर्णे द्वभरतर्षभ ।। द्वादशेहनि षण्मासे त्रिपक्षे वा त्रिमासिके ।। एकादशेपि वा मा
सि मंगलस्याप्युपस्थिता विति ।। एते च सप्त कालाः इच्छया विकल्प्यंत इति माधवः ।। वस्तुतस्तु बहुभिर्वचनैर्वंश
रानस्य मुख्यकालत्वादेते अनुकल्पा एवेति युक्तं ।। एतेषु कालेषु द्वादशाहः प्रशस्त इत्याह व्याघ्रः ।। आनंत्यात्कुल
धर्माणां पुंसां चैवायुषः क्षयात् ।। अस्थितत्वाच्छरीरस्य द्वादशाहः प्रशस्यत इति ।। राजन्यवैश्ययोराशौचांते स
पिंडीकरणं कार्यं ।। तथा च वृद्धमनुः ।। द्वादशेहनि विप्राणामाशौचांते तु भूभुजां ।। वैश्यानां तु त्रिपक्षादाव
यथास्यात्सपिंडनमिति ।। अथवेति पक्षांतरं ।। वैश्यानामाशौचांते त्रिपक्षे वेति ।। निर्णयामृते कात्यायनो
पि ।। सर्वेषामेव वर्णानामाशौचांते सपिंडनमिति ।। सर्वेषां विप्रराजन्यविशां ।। शूद्राणां त्वाशौचे सत्यपि ।।
मंत्रवर्जं हि शूद्राणां द्वादशेहनि कीर्त्तितमिति ।। वि[illegible]द्वादशाह एव ।। अद्धपूर्तेः पूर्वमेव द्वादशाहे सपिंड

शूके

श्रा०चं० नैक्रियमाणेआदौषोडशश्राद्धापकर्षणंज्ञेयं॥तथाचश्राद्धवसिष्ठः॥श्राद्धानिषोडशप्रादत्त्वानतुकुर्यात्सपिंडनं॥तद्धा
४८ नौनुकृते:अत:पितृत्वंनप्रपद्यतइति॥एवंचसपिंडनोत्तरमपिस्वस्वकालेपुनर्यथरदाब्दिकंतान्यावर्तनीयानि॥यस्यसं
वत्सरादर्वाक्विहितातुसपिंडना॥विधिवत्तानिकुर्वीततपुनःश्राद्धानिषोडशेतिगोभिलोक्तेः॥विधिचयथासप्रदायमे
ठी कोद्दिष्टक्रमेणपार्वणक्रमेणवेत्यर्थः॥तदुक्तंपै नसिना॥सपिंडीकरणादर्वाकुर्याच्छ्राद्धानिषोडश॥एकोद्दिष्टवि
धानेनकुर्यात्सर्वाणितानितु॥सपिंडीकरणादूर्ध्वंयदाकुर्यात्तदापुनः॥प्रत्यब्दंयोयदाकुर्यात्तथाकुर्यात्सतान्यपी॥अत्र
गोभिलवचनेषोडशग्रहणंपिपुनरावृत्तिः॥प्राप्तकालीनानांतुस्वस्वकालेअनुष्ठितानां॥अर्वागब्दाद्यत्रयत्रसपिंडी
करणंकृतं॥तदूर्ध्वंमासिकानांतुयथाकालमनुष्ठितिरितिकार्ष्णाजिनिवचनात्॥वृद्धिप्राप्ताववश्यंसपिंडनोत्त
रमावर्तनीयानामनुमासिकानांभूयोप्यपकर्षःकार्यः॥तदुक्तंशाट्यायनिना॥सपिंडीकरणादर्वागपकृष्यकृतान्य
प पि॥पुनरप्यपकृष्यंतेवृध्युत्तरनिषेधनादिति॥निषेधमाहकात्यायनः॥निर्वृत्तवृद्धितंत्रंतुमासिकानिनतंत्रयेत्॥आ
पातयामंमरणंनभवेत्पुनरस्यहीति॥यदिवृद्धिश्राद्धोत्तरंमासिकानिकुर्यात्तदामृतस्यमरणंपुनर्भवेदितितिदो
रूपोदोषः॥अत्रयथाफलचमसेराजन्यवैश्ययनिमित्तेनविहितेसोमांगीनामभिषवक्रियादीनांविधिर्नसमा ४८
नस्तद्वद्वृध्यादिनिमित्तेनविहितःसपिंडीकरणेमासिकापकर्षश्चौलोपनयनसमावर्तनविवाहाग्न्याधानेष्टापूर्त

दिष्वेव॥नतुगर्भाधानसीमंतजातकर्मनामकरणान्नप्रा[illegible]शनकास्तुपूजाश्रेताद्याद्यंगभूतवृद्धिश्राद्धेषितिनिष्कर्षः॥नि
र्णितश्चायमेवार्थोद्वैतनिर्णयेस्माभिःपातु:पितामहचरणैः॥वृद्धिविनातेषामनुमासिकानामपकर्षणंनकर्तव्यं॥अंत
रेणैवयोवृद्धिमेतश्राद्धानिकर्षति॥सश्राद्धेनरकेघोरेपितृभिःसहमज्जतीतिशाट्यायनिस्मरणात्॥विप्रवत्प्रोनस या
र्वेषप्युक्तकालेषुनजातंचेत्सपिंडनंतदाकालांतरमाह॥ऋष्यशृंगः॥सपिंडीकरणश्राद्धमुक्तकालेनचेत्कृतं॥रोहि
हस्तेचरोहिण्यामैत्रभेवासमाचरेदिति॥तत्रपुत्रसत्तिसएवचिरकालादपिकुर्यान्नसंनिहितोपिभ्रातृपुत्रादि
र्यथाकालमिति॥श्राद्धानिषोडशानत्वानतुकुर्यात्सपिंडनं॥प्रोषितावसितेपुत्रःकालादपिचिरादपीतिवायुपु
राणवाक्यात्॥तत्रापिज्येष्ठस्यैवाधिकारः॥तदाहप्रचेताः॥एकादशाद्याःक्रमशोज्येष्ठस्यविविधक्रीयाः॥
कुर्युर्नैकेकशःश्राद्धमाब्दिकंतुपृथक्पृथगिति॥नन्वेवमेकादशाद्याइतिप्रचेतोवाक्यादेकादशाहमासिकेष
पिसपिंडीकरणवज्ज्येष्ठभ्रातृकर्तृकताप्रसंगइतिचेन्मैवं॥पूर्वाःक्रियामध्यमाश्चतथाचैवोत्तराःक्रियाः॥त्रि
प्रकाराःक्रियाह्येतास्तासांभेदंशृणुष्वमे॥आद्याहाद्द्वादशाहाच्चमध्येयाःस्युःक्रियामताः॥ताःपूर्वामध्यमा
मा मासिस्यैकोद्दिष्टसंज्ञिताः॥प्रेतेपितृत्वमापन्नेसपिंडीकरणादनु॥क्रियंतेयाःक्रियाःपित्र्याःप्रोच्यंतेतानृ
पोत्तमाः॥पितृमातृसपिंडैस्तुसमानसलिलैस्तथा॥तत्संघातगतैश्चैवतद्राज्ञाधनहारिणा॥पूर्वाःक्रियाम

श्रा०वं० ध्यमाश्च पुत्राद्यैरेव चान्तराः ॥ दौहित्रैर्वा नरश्रेष्ठ कार्यास्तत्तनयैस्तथेति विष्णुपुराणे पराशरोक्त्यात् ॥ अत्र हि मासि
४९ ल मासी[redacted]स्या विवक्षितत्वादेकादशाहादेः सपिंडीकरणश्राद्धकालीनैकोद्दिष्टमात्रस्य मध्यमक्रियात्वेन
सपिंडादीनां नृपसत्तमानां तत्र कर्तृत्वोक्त्या ज्येष्ठकर्तृत्व नियमस्य तत्रापवादत्वात्तदुत्तरे सपिंडीकरण एव ज्येष्ठक
र्तृत्व नियमो व तिष्ठते ॥ सपिंडीकरणोत्तरक्षयाहामावास्या महालया दिरूपोत्तरक्रियासु यथा पितृपुत्रभावे
पौत्राद्यैरेव[redacted]श्चोत्तरा इत्यनेन पुत्रः पौत्रःप्रपौ[redacted]पूजयेत् ॥ अर्घ्यपुष्पैस्तथा धूपैर्दीपमाल्यानुलेपनैः ॥ मुख्य
तु पितरः कृत्वा पुनस्त्वन्यान्यथाक्रममिति ॥ भ्रात्रा भ्रातृवा [redacted] भ्रातृसंततिरिति निर्दिष्टानां भ्रातृसंततसंतानां दौ
हित्रतत्तनयानां कर्तृत्वमुक्तं तथा पितृसपिंडादीनामवनीपसत्तमानां निवृत्त्यर्थं न तु ज्येष्ठे सतीतरेषां कर्तृत्वाय द्धिकं तुपृ
ष थक् पृथगिति वचनेतो वाक्यशौ[redacted]स्तु विभक्तविषयः ॥ ज्येष्ठे संनिहिते कनिष्ठो आहिताग्निः कुर्यादेव ॥ अन्यथा पि
तृयज्ञासिद्धेः ॥ एवमाभ्युदयिक वृद्धिश्राद्धे पिकनिष्ठोन्यः सपिंडो वा कुर्यात् ॥ भ्राता वा भ्रातृपुत्रो वा सपिंडः शिष्य ए
ववा ॥ सहपिंडक्रियां कृत्वा कुर्यादभ्युदयं ततः इति लघुहारीतवचनात् ॥ न्वत्र वचने कृत्वा प्रत्ययेन समानकर्तृकत्वा न
वगमात् कथं मृतस्य पुत्रादेरन्य एव सपिंडः सपिंडीकरणं करोत्विति नैश्च सपिंड आभ्युदयिकमिति चेन्नैवं ॥ प्रेतकर्मा ४९
८ ण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियां ॥ आचतुर्थं ततः पुंसि पंचमे शुभदं भवेदिति मेधातिथिपरिधृतवचनान्मूलपुरु

षात् चतुर्थमभिव्याप्य यस्य कस्यापि सपिंडस्य मृतस्य मासिकसपिंडीकरणं विनाभ्युदयिककर्तुराभ्युदयिके योग्यतासिध्य
भावेनाश्लोकस्य समानकर्तृकत्वस्याविवक्षितत्वात् ॥ अत्र भ्रात्रादयो मृतस्य बोध्याः ॥ केनापि निमित्तेन कनिष्ठेन सपिंडी
करणे कृते सत्य संनिहित ज्येष्ठो पितुनः प्रेतश्राद्धमंतरा न कुर्यात् ॥ यवीयसा कृतं कर्म प्रेतश्राद्ध विहायतु ॥ तज्ज्यायसापि
कर्तव्यं सपिंडीकरणं पुनरिति स्मृतेः ॥ स्मृत्यर्थसारे तु ॥ विभक्ता वृद्धिका माश्चेत्पुत्राः कुर्युः पृथक् पृथगिति पक्षांतरमुक्तं ॥
येतु ऋध्यादिनिमित्तं विनापि ॥ मातापित्रोर्मृते काले ज्येष्ठे देशांतरे गते ॥ कनिष्ठेनप्रकर्तव्यं सपिंडीकरणं तदेति वच
नात्कनिष्ठेन कार्यमित्याहुस्तेस्य वचनस्याप्रामाण्येन निरस्ता वेदितव्याः ॥ ॥ सपिंडीकरणेतिकर्तव्यता माह याज्ञ
वल्क्यः ॥ गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयं ॥ अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ॥ ये समाना इति द्वाभ्यां शेष
पूर्ववदेवाचरेदिति ॥ अर्घ्यसंयोजनं च प्रेतार्घ्यदानानंतरमवशिष्टेन जलेन पितामहार्घ्यदानात्पूर्वं कार्यं ॥ तथा च म
दनरत्ने ब्रह्मपुराणे ॥ प्रेतविप्रस्य हस्ते तु चतुर्भागजलं क्षिपेत् ॥ ततः पितामहादिभ्यस्तन्मंत्रैश्च पृथक् पृथक् ॥ ये
समाना इति द्वाभ्यां तज्जलं तु समर्पयेत् ॥ अर्घ्योक्तेनैव विधिना प्रेतपात्रादि पूर्ववत् ॥ तिभ्यो र्घ्यविनिवेद्यैव पश्चाच्चस्व
यमाचरेदिति ॥ चतुर्भाग चतुर्थभागं ॥ ॥ पिंडसंयोजने विशेषस्तत्रैव ॥ दत्वा पिंडमथौ[redacted]गध्याहात चसुभा ह
स्वरं ॥ सुवर्णरूप्यदर्भैस्तु तस्मिन्पिंडत्रये त्रिधा कृत्त पितामहादिभ्यः पितृभ्यः प्रेतमर्पयेत् ॥ सुवर्तुलौ स्तत स्त्रीं स्त्री

आ०व० पिंडान्कृत्वा प्रपूजयेत् ।। अर्घ्यैः पुष्पैस्तथा धूपैर्दीपमाल्यानुलेपनैः ।। मुख्यं तु पितरं कृत्वा पुनस्तन्यान्यथाक्रममिति ।।
पि यदा पिता म्रियते पिता महो जीवति तदा प्र[illegible]तामहादिभिस्त्रिभिः सपिंडनं कार्यं ।। मृते पितरि यस्याथ विद्यते च
५० पि पितामहः ।। तेनेदेयास्त्रयः पिंडाः प्र[illegible] तामहपूर्वकाः ।। तेभ्यस्तु पैतृकः पिंडो नियोक्तव्यस्तु पूर्ववत् ।। नदेयो जीवते पिं
डः स च यस्मान्मृतो भवेत् ।। पिंडस्तु जीविताहस्ते शिरच्छेद समो भवेदिति ।। तथा ।। मातर्यग्रमृता या च विद्यते च पि
तामही ।। प्रपितामही पूर्वं तु कार्यस्तत्राप्ययं विधिरितिहेमाद्रिधृत ब्रह्मपुराणात् ।। एवं च प्रपितामहे पि जीवति तित्रा ता
दिभिः कार्यं ।। तदाह सुमंतुः ।। त्रयाणामपि पिंडानामेकेनापि सपिंडने ।। कृते इति शेषः ।। पितृत्वमश्नुते प्रेत इति ध
र्मो व्यवस्थितः ।। त्रयाणां प्रेतपित्रादीनां पिंडानामिति निर्धारे षष्ठी ।। यत्तु ।। व्युत्क्रमाच्च मृतानां तु नैव कार्या सपिंडतेति
स्तन्मातौ [illegible]षविधिः स्मृत इति पराशरीयेत्स्कादौक्तेः ।। यदि पितामहप्रपितामहयोर्द्वयोरेकस्यैव वा कर्तुं संनिधान
रूपप्रतिबंधात्सपिंडीकरणं न जातं ।। स्वपितुस्तु द्वादशाहादिवर्षांतनपर्यं गे कालो दिक्रमसंभावना[illegible]स पिंडीकरण शूल्ये यां
नापि पितामहादिनासह स्वपितरं संस्कुर्यात् ।। असंस्कृतौ न संस्कार्यौ पूर्वौ पौत्रप्रपौत्रकैः ।। पितरं तत्र संस्कुर्यादिति कात्या
पि यनो क्तीत् ।। पापिष्ठमे[illegible]शुद्धेन शुद्धं पापकृतापि वा ।। पितामहेन पितरं संस्कुर्यादिति निश्चयति कात्यायनोक्तेः ।। अयम
र्थः ।। पूर्वौ पितामहप्रपितामहौ ।। पापिष्ठमकृत सपिंडनं ।। न तु पातित्ये स्थितं ।। पापकर्मिणां न संसृज्येरन्निति गौतमोक्तेः ।। ५०
तादृशं पितरं [illegible]शुद्धेन निवर्तित सपिंडीकरणेन वा पितामहेन साकं शुद्धं संस्कुर्यादिति
यं ।। व्युत्क्रमेण मृतानां तु सपिंडीकृतिरिष्यते ।। यदि माता यदि पिता भर्ता नैव×६

२× प्रथमेऽब्दे न कुर्वीत कृते पितुः सपिंडने ।। दर्शश्रा० सिर्कं×२

शास्त्रस्य निश्चय इति तादृशाभ्यां सह मासिकान्यपि कार्यं ।। पितुः सपिंडनं कृत्वा कुर्यान्मासानुमासिकमिति ।। तेनैवोक्तत्वात् ।। इदं चानि
ना शेषो[illegible]दग्ध्यां सह दर्शश्राद्धमपि स्यादेव ।। केचित्तु ।। दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपाक्षिकं ।। प्रथमेऽब्दे पि कुर्वीत यदि स्याद्भक्तिमा
न्सुत इति वचनद्वयं पठंति ।। तस्यायमर्थः ।। द्वितीयवचने सुतग्रहणादाब्दिकदर्शश्राद्धादीनि श्राद्धानि सुत एव कुर्यान्नान्यो भ्रात्रादिः ।।
भक्तिमत्वं तु कर्मांगतया प्राप्तमनूद्यते ।। अतः सुतेन पित्रोरेवाब्दिकदर्शश्राद्धादिकं श्राद्धं कार्यं ।। यस्तु प्रमीतौ पितरौ यस्य देहस्तस्या
शुचिर्भवेत् ।। नदैवं नापि वा पित्र्यं यावत्पूर्णो न वत्सर इति देवलवचनेन पित्र्यकर्म[illegible]षेधः स वर्षपर्यंतं सपिंडीकरणाकरणे बोध्यः ।। सकाम्य जि
पित्र्यकर्मविषयः ।। ।। अथ स्त्रीणां वदामः ।। हेमाद्रौ शातातपः ।। मातुः सपिंडीकरणं कथं कार्यं भवेत्सुते ।। पितामह्यादिभिः सार्धं सपिंडीकरणं सहे
स्मृतं ।। पक्षांतरं तत्रैव ।। मातुः सपिंडीकरणं पत्या सार्धं विधीयते ।। यस्मात्पतिव्रतानां वै स एव गतिरिष्यते ।। एवं सति संदेहे व्यवस्था भविष्युपु
राणे ।। जीवत्पिता पितामह्या मातुः कुर्यात्सपिंडनं ।। प्रमीतपितृकः पित्रा पित्रा पुत्रिकौ तः ।। तत्पित्रा भातुः पित्रेत्यर्थः ।। कौगाक्षिपरिशि सु
पितामह्यादिभिः सार्धं मातरं तु सपिंडयेत् ।। पितरि ध्रियमाणे तु तेनैवोपरते सतीति ।। अथ वा येनास्य पितरो याता येन याताः पितामहाः ।।
तेन यायात्सतां मार्गं तेन गच्छन्न दुष्यतीत्यादिवचनैः स्वकुलपरंपराविच्चार्य व्यवस्था बोध्या ।। सुमंतुरपि ।। एवं शास्त्रगतिर्भिन्ना सर्वकर्म
सुभारत ।। उदितेनुदिते चैव होमभेदे यदा भवेत् ।। तस्मात्कुलक्रमायातमाचारं चाचरेद्बुध इति ।। अपुत्राविषये पै[illegible]नसिः ।। अपुत्रायां मृतायां ठी
यां तु पतिः कुर्यात्सपिंडनं ।। श्वश्र्वादिभिः सहैवास्याः सपिंडीकरणं भवेदिति ।। अन्वारोहणे तु पत्यैव सह नियतं सपिंडनं ।। मृता यानुग
ते तानापि सा[illegible]नसह पिंडत्वं ।। अर्हति स्वर्गवासे च यावदाभूतसं[illegible]वमिति ।। शातातपोक्तेः ।। पत्या चैकेन कर्तव्यं सपिंडीकरणं स्त्रियाः ।। सा
मृतापि हि तेनैक्यं गता मंत्राहुतिं[illegible]रिति यमोक्तेश्च ।। अत्र केचित्पतिव[illegible]ण सपिंडनमाहुस्तदशुद्धं ।। एकेन सस्य वैयर्थ्यसंभवात् ।।
व्रतै संप्र२ गै

श्रा० चं० तस्मात्केवलभर्तृपिंडेनैव संयोजयेत्॥ संयोजनं च सपिंडीकृतभर्तृपिंडेनैव कार्यं॥ पूर्वोक्तश्लोके तेनोनसंस्कार्यो वित्यादि
५९ वचनात्तथा दृष्टत्वात्॥ पतिपिंडसपिंडनोत्तरमाद्यपिंडपिंडस्य पतिपिंडत्वाभावाच्च॥ यदि मृतस्य पुत्रवत्यो द्वे भार्ये तयोर्मध्ये एका वा
निष्कान्वारोहणे कृते ज्येष्ठः पुत्रः पितरौर्ध्वदेहिकं कुर्यात्॥ अन्वारूढपुत्रः पृथक् कुर्यात्॥ ज्येष्ठेन निरूपितत्वाभावात्॥ सपिं-
डनं तु तद्दिन एव द्विनीनरेवापितृसपिंडनोत्तरमेव कार्यं॥ एवं बह्वीष्वपि बोध्यं॥ यतीनां तु सपिंडनं नास्ति॥ सपिंडीकरणं
तेषां न कर्तव्यं सुतादिभिः॥ त्रिदंडग्रहणादेव प्रेतत्वं नैव जायते॥ एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा॥ अहन्येका-
दशे प्राप्ते पार्वणं तु विधीयते इति उशनोवाक्यात्॥ सपिंडने काम्यकालौ विश्वेदेवाविति सदितिप्राक्॥ मलमासेप्येतत्कार्यमेव॥
अधिमासे न कर्तव्यं श्राद्धमाभ्युदयं तथा॥ तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृत इति हारीतोक्तेः सपिंडीकरणप्रयोगस्तु
राम अस्मत्प्रपितामहभट्टश्रीनारायणभट्टपादविरचितायां अंत्येष्टिपद्धतौ द्रष्टव्य इति॥ मातुः श्राद्धाधिकारे गोत्रव्यव-
स्थामाह मार्कंडेयः॥ ब्राह्मादिषु विवाहेषु यानूढा कन्यका भवेत्॥ भर्तृगोत्रेण कर्तव्या तस्याः पिंडोदकक्रिया॥ आसुरा-
दिविवाहेषु पितृगोत्रेण धर्मवित्॥ इति संक्षेपः॥ ॥इति श्रीभारद्वाजमहादेवभट्टात्मजदिवाकरविरचितायां श्राद्धचं- राम
द्रिकायां सपिंडीकरणनिर्णयः॥ ॥अथ विभक्ताविभक्तनिर्णयं ब्रूमः॥ मिताक्षरायां नारदः॥ भ्रातृणामविभक्तानामे- ५९

को धर्मः प्रवर्तते॥ विभागे सति धर्मोऽपि भवेत्तेषां पृथक् पृथक्॥ मरीचिरपि॥ बहवः स्युर्यदा पुत्राः पितुरेकत्रवासिनः॥ सर्वे-
षां तु मतं कृत्वा ज्येष्ठेनैव तु यत्कृतं॥ द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्॥ बृहस्पतिरपि॥ एकपाके निवसतां पितृदेवद्वि-
जार्चनं॥ एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे इति॥ अविभक्तानामेकपाकानां ब्रह्मयज्ञादि पृथगेव भवति॥ पृथ-
गप्येकपाकानां ब्रह्मयज्ञो द्विजन्मनां॥ अग्निहोत्रं सुराचार्चा संध्या नित्यं भवेत्पृथक्॥ इत्याश्वलायनोक्तेः॥ यदा अवि-
भक्ताः संसृष्टा भ्रातरस्तदा ज्येष्ठ एव यज्ञादीन्कुर्यात्॥ होमं दानं रहितं न भोक्तव्यं कदाचन॥ अविभक्तेषु संसृष्टेष्वेकेनापि
कृतं कृतमिति व्यासवचनात्॥ संसृष्टेष्वित्युक्तत्वान्नासंसृष्टेषु पृथगेव भवंति॥ तथा चाश्वलायनः॥ वसतामेकपाके
न विभक्तानां न पिप्रभुः॥ एकस्तु चतुरो यज्ञान्कुर्याद्द्रव्यसपूर्वकान्॥ अविभक्ता विभक्ता वा पृथक्पाका द्विजातयः॥
कुर्युः पृथक्पृथग्यज्ञान्भोजनाद्यान्दिने दिने इति पैठीनसिः॥ विभक्तैस्तु पृथक्कार्यं प्रतिसंवत्सरादिकं॥ एकेनैवावि-
भक्तेषु कृते सर्वैस्तु तत्कृतं॥ सपिंडीकरणांतानि श्राद्धानि विभागे सत्यपि अग्रज एव कुर्यात्॥ तथा च लघुहारीतः॥
सपिंडीकरणांतानि यानि श्राद्धानि षोडश॥ पृथङ्नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचिदिति॥ उशना अपि॥ न-
वश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश॥ एकेनैव तु कार्याणि संविभक्तधनेष्वपि॥ पिंडदानोत्तरं व्यासः॥ अर्वाक्संवत्सराज्ज्येष्ठः

श्रा०चं० श्राद्धं कुर्यात्समेत्यतु॥ ऊर्ध्वं सपिंडीकरणात्सर्वे कुर्युः पृथक् पृथक्॥ एवं सति द्वादशाहादिषु सपिंडने क्रियमाणे नु मासि
५२ कोदकुंभश्राद्धानि विभक्ता पृथक् पृथक् भवंति॥ मघाश्राद्धमविभक्ता अपि पृथक् कुर्युरित्युक्तं दर्शश्राद्धं॥ अवि
भक्तभ्रातृणां युगपत्तीर्थप्राप्तौ ज्येष्ठ एव तीर्थश्राद्धं कुर्वीत॥ भेदेन प्राप्तौ भिन्नमेव॥ दर्शग्रहणयुगादिश्राद्ध
मविभक्तेषु ज्येष्ठस्यैव॥ केचित्तु॥ अविभक्तेन पुत्रेण पितृमेधो यत्ना हनि॥ देशांतरे पृथक्स्थो यो दर्शश्राद्धं तथैव
चेति यमवचने देशांतरस्थिति ता मविभक्तभ्रातृणां दर्शश्राद्धादिकं भिन्नमेव भवतीत्याहुः॥ आचारोपि शिष्टानामेवं॥ मे
केचित्तस्य वचनस्य निर्मूलत्वमाहुरिति दिक्॥ ॥अथ जीवत्पितृकस्य श्राद्धाधिकारविचारः॥ ॥कात्यायनः॥ सपितुः पितृकृ
त्येषु अधिकारो न विद्यते॥ लौगाक्षिरपि॥ दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षकं॥ न जीवत्पितृकः कुर्यात्तिलैः कृष्णे
श्च तर्पणमिति॥ क्रतुरपि॥ अष्टकादिषु संक्रांतौ मन्वादिषु युगादिषु॥ चंद्रसूर्यग्रहे पाते स्वेच्छया पूज्ययोगतः॥
रविर जीवत्पिता नैव कुर्याच्छ्राद्धं काम्यं तथा [illegible]लं इति॥ काम्य॥ रेवतीषु तथा रोप्यमश्विनीषु तु रंगमान॥ श्राद्धं कर्तुं
स्या॰ तथाग्नौ तिभरणीषायुरुत्तमं॥ तस्मात्का[illegible]निकुर्वीत ऋक्षेष्वेतेषु मानव इति मार्कंडेयादिप्रणीतवचनं॥ ५२

पूज्ययोगः अलभ्ययोगो निमित्तकं॥ आदिना पिंडपितृयज्ञग्रहणं॥ अत एव पिंडपितृयज्ञं प्रक्रम्याश्वलं बः॥ यदि जीवत्पि
ता न दद्यादा होमात्कृत्वा विरमेदिति॥ केषुचिच्छ्राद्धेषु त्वधिकारो मैत्रायणीयपरिशिष्टे॥ अन्वष्टक्यं गयाप्राप्तौ सत्या
यश्च मृतेहनि॥ मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवति॥ अन्वष्टक्यं महालयांतरगतं तन्नवम्यां क्रियमाणं मा
तृश्राद्धं॥ गयाप्राप्तिः प्रासंगिकी॥ न तु बुद्धिपूर्विका॥ गयां प्रसंगतो गत्वा मातृश्राद्धं समाचरेत् इति वचनात्तच्च
केवलमातृवर्गस्यैव न तु मातामहादीनामपि॥ जीवत्पितुर्वृद्धिश्राद्धे षट्दैवत्यं तत्र विशेषः॥ वृद्धौ तीर्थे च संन्यस्ते
ताते च पतिते सति॥ येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति॥ ताते संजीवति वृद्धौ तीर्थे संन्यस्ते पतित पदैः प्रत्येकं संबध्य
ते॥ तत्राप्याभ्यां व्यधिकरण्येनेत्युक्तं मयूखे श्रीमातामहगुरुचरणैः॥ मनुः॥ पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः॥
पितुः स नाम संकीर्त्य कीर्तयेत्प्रपितामहमित्युक्तं॥ ॥अथ तीर्थश्राद्धं॥ जागर्ति सेतुर्भुवि भद्रनिर्मितस्तथापि किंचि
त्प्रवदामि भूयः॥ यात्राधिकारी कथयत्सु वर्णेष्वित्यादि संक्षेपत एव सर्वं॥ तत्र॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा राजस
त्तम॥ न वियोनिं व्रजंत्येते स्नाता तीर्थे महात्मन इति भारते व्यासवचनात्तीर्थयात्रायां चातुर्वर्ण्यस्याप्यधिकारः॥

आ॰ चं॰ तत्र पत्नीं विना न गच्छेदित्याह धर्मः ॥ पूतां पुण्यतमां भार्यां यो वा सह कृत्वा प्रयाति हि ॥ तस्य पुण्यफलं सर्वं तथा भवति नान्यथेति ॥ कौर्मे ॥ सहाग्निर्वा
५३ सपत्नीको गच्छेत्तीर्थानि संयतः ॥ प्रायश्चित्तनिमित्तं गच्छेच्चेत्पत्नीको पि गच्छेत ॥ प्रायश्चित्ती व्रजेत्तीर्थं पत्नीविरहितो पि वा ॥ यत्र च नधिकारी वा
पत्न्यभावान्मंत्रसाधका इति तत्रैवोक्तेः ॥ स्कांदे विधवाधर्मप्रकरणे ॥ स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः ॥ कुर्याद्वैसग्निमेणान्वयः ॥ यदि
तु भर्तुर्वचोऽनपत्यपत्नीर्थयात्राप्रव्रज्यामंत्रसाधनं ॥ देवताराधनं चैव स्त्रीशूद्रपतनानि षट् इति ॥ तन्निरंतरं तीर्थयात्रादिनिषेधकं ॥ तथा च शाता
तपः ॥ निरंतरं तीर्थसेवा संन्यासो मंत्रसाधनं ॥ देवताराधनं ध्यानं तेषां पौर्वाह्हं पदमिति ॥ प्रसंगेन तीर्थप्राप्तौ फलमप्यनेनाह हारीतः ॥ स्वपैठीनसी ॥ तीप
र्थप्राप्य प्रसंगेन स्नानं तीर्थे समाचरेत् ॥ स्नानजं फलमाप्नोति तीर्थयात्राकृतं न तु ॥ अर्धं तीर्थफलं तस्य यः प्रसंगेन गच्छति ॥ षोडशांशं स लभते यः परा
र्थेन गच्छति ॥ तीर्थयात्रा च पद्भ्यां कार्या ॥ तीर्थानुगमने पद्भ्यां तपः परमिहोच्यते ॥ तदेव कृत्वा यानेन स्नानमात्रफलं लभेदिति ॥ प्रभासखंडात् ॥ अश
क्तेन यानमाहृत्यापि गंतव्यं ॥ असमर्थस्तु यानेन तीर्थयात्रां समाचरेत् ॥ न दुष्कृतफलमाप्नोति स्वशक्त्या धर्ममीरितमिति गोभिलोक्तेः ॥ यानमुक्तं च
कूर्मपुराणे ॥ नरयानं चाश्वतरीहयादिसंहितो रथः ॥ तीर्थयात्रास्वशक्तानां यानं दोषकरं न हि ॥ अत्र चेच्चिंकोनौयानमयानं स्यादिति
अवचनान्नौकायाने दोषाभावमाहुः सत्तु यं ॥ यानेषु नौकायाऽपि परिगणितत्वात् ॥ अयानमिति तु नरयानवदनुकल्पसूचकं ॥ व्यवस्थापितं
च सामान्यप्रघट्टके नावो यानत्वमस्मन्मातुः पितामहभट्टश्रीनारायणभट्टपादोक्तैः ॥ सोपानत्को व्रजेच्चेत्फलं अस्य ने याह जाबालिः ॥
द्विभौ जनं तत्र तीयारांह हरे तीर्थफलस्य च ॥ यानमर्धं वलु तुर्यांशं धुंत्रो पाहनेमेव च ॥ तस्माद्वेतैर्विहीनस्तु सर्वं तीर्थफलं लभेदि ५३
ति ॥ प्रथमतीर्थयात्रायां कालशुद्धिर्ग्रंथगौरवभीत्या ह नो का न जागरूके सामान्यप्रघट्टके द्रष्टव्या ॥ ॥ ॥

अथ यात्राविधिः ॥ ॥ उपोष्य रजनीमेकां प्रातः श्राद्धं विधाय च ॥ गणेशं ब्राह्मणं नत्वा भुक्त्वा प्रस्थितवान्सुधीरिति स्कांदात्पूर्वदिनमु
पोष्य द्वितीयेन्हि श्राद्धं कृत्वा गणेशादीन्नत्वा भुक्त्वा प्रस्थानं कुर्वीत ॥ इदं च श्राद्धं घृतद्रव्यकं कार्यं ॥ गच्छेद्देशांतरं यस्तु श्राद्धं कु
र्यात्स सर्पिषा ॥ यात्रार्थमिति तत्प्रोक्तं प्रवेशे न च संशय इति विष्णुपुराणोक्तेः ॥ सामान्यप्रघट्टके भट्टपादैस्तु घृतमुख्यद्रव्ये दा
णकार्यमित्युक्तं ॥ उपवासात्प्राक्मुण्डनं कुर्यात् ॥ प्रयागे तीर्थयात्रायां पितृमातृवियोगतः ॥ कचानां वपनं कुर्या
द्वृथा न विकचो भवेदिति विष्णूक्तेः ॥ इदं च वपनं प्रायश्चित्तेन तीर्थयात्रायामेव कार्यमिति केचित् ॥ कार्पटिकवेषेणो
व तीर्थगमनं तदित्यन्ये ॥ कार्पटिकवेषः कार्य इत्युक्तं वायुपुराणे ॥ उद्यतस्तु गयां गंतुं श्राद्धं कृत्वा विधानतः ॥
विधाय कार्पटीवेषं कृत्वा ग्रामं प्रदक्षिणं ॥ ततो ग्रामांतरं गत्वा श्राद्धशेषस्य भोजनं ॥ ततः प्रतिदिनं गच्छेत्प्रति
ग्रहविवर्जित इति ॥ केचित्तु गयामुपक्रम्योक्तत्वादस्य विधानस्य गयायात्रायामेव वेषः कार्पटीवेषः कार्य इत्याहुः ॥ स
र्वतीर्थयात्रामपीति भट्टपादाश्च यः ॥ केचित्तु गयायात्रायां गवपनं न कार्यमित्याहुः ॥ केशश्मश्रुलोमनखादीनां वपनं न च शस्यते ॥
अतो न कार्यं वपनं गयाश्राद्धार्थिनावसदेति महाभारतात् ॥ तीर्थं गच्छतां तरा पुण्यनदीप्राप्तौ विशेषः ॥ मार्गेंतरा नदीं प्राप्तो स्नाना
दिपरपारतः ॥ अर्वाग्गेव सरस्वत्याः पमार्गगतोविधिरिति ॥ तत्रापि श्राद्धादिकार्यमेव ॥ अर्धं तस्य फलं तस्येति प्रागुक्तवचनात् ॥ गच्छतो मध्ये मार्गमाशौ

दि

श्रा०च० चौसंभवे शुद्धिपर्यंतं तत्र स्थित्वाग्रे गच्छेत्॥ तीर्थे गच्छेश्वरेत्संध्यास्त्रिस्त्र एव न मानवः॥ नास्नातो नाशुचिर्गच्छेन्न भुक्त्वा
५४ न च सूतकी॥ तिसामौ प्रपघट्टके श्रीभट्टपादपाथोजधृतवचनात्॥ ॥अर्थ तीर्थप्राप्तो प्रभासखंडे॥ यानादि तु परि
त्यज्य भाव्यं पादचरैर्नरैः॥ लुंठित्वा लोठिनीं तत्र कृत्वा कार्पटिकाकृतमिति॥ लोठनीं लुंठित्वा साष्टांगं प्रणम्येत्यर्थः॥
अष्टांगप्रणामस्तु॥ पद्भ्यां कराभ्यां जानुभ्यां शिरसा चोरसा तथा॥ मनसा वचसा दृष्ट्या प्रणामोऽष्टांग उच्यते इति॥
अनंतरं॥ प्रथमं चालेत्तीर्थं प्रणवेन जलं शुचिः॥ अवगाह्य ततो स्नायाद्यथावन्मंत्रयोगतः इति॥ चालये स्मरेत्
त॥ मंत्रस्तु॥ तीक्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम॥ भैरवाय नमस्तुभ्यं अनुज्ञां दातुमर्हसि इति॥ इमं मं
त्रं समुच्चार्य तीर्थे स्नानं समाचरेत्॥ अन्यथा तत्फलस्यार्द्धं तीर्थे रोगा हरन्ति ध्रुवं॥ एतन्मंत्रवत्स्नानं प्रवनोत्त
रं कार्यं॥ पूर्वमाप्लवनं तीर्थे मुंडनं तदनंतरं॥ ततः स्नानादिकं कुर्यात्पश्चाच्छ्राद्धं समाचरेदिति स्मृतेः॥ काशीखं
डे॥ तीर्थोपवासः कर्तव्यः शिरसो मुंडनं तथा इति॥ नारदीयेपि॥ तीर्थसामाद्य कुर्वीत नरः शुचिरुपोषणं॥ उप ५४

वासविशुद्धात्मा कर्तव्यं कर्तुमर्हतीति॥ उपवासकालः काशीखंडे॥ उपवासः प्रकर्तव्यः प्राप्ते ह्निश्राद्धदो भवेदिति॥ अ
नेन तीर्थप्राप्तिदिनात्पूर्वदिने उपोषणं नियतं प्राप्तं तदुपवासे ततः कुर्यात्तस्मिन्नहनि स्कंप्रत इति वचनेन विकल्प्यते॥
तस्मिन्नहनि तीर्थप्राप्त्यहनि॥ केषुचित्तीर्थेषु मुंडनोपवासौ निषेधति देवालः॥ मुंडनं चोपवासश्च सर्वतीर्थेष्व
यं विधिः॥ वर्जयित्वा कुरुक्षेत्रं विशालं विरजं गयामिति॥ मुंडनप्रकारः स्कांदे॥ उदङ्मुखः प्राङ्मुखो वा वपनं
कारयेत्सुधीः॥ केशश्मश्रुलोमनखान्युदक् संस्थानि वापयेदिति॥ प्रयागे सधवा नाम पीदं समूलं भवती
ति श्रीभट्टपादाः॥ केचित्तु सर्वान्केशान्समुद्धृत्य छेदयेद्द्व्यंगुलद्वयं॥ एवमेव हि नारीणां शस्यते वपनक्रियेति॥
सु वचाद्व्यंगुलद्वयपरिमितकेशच्छेदनरूपं प्राहुः॥ सन्यासिनस्तु तीर्थे पितृतु संधिष्वेव मुंडनं कुर्युः॥ कक्षोपस्थशिखा
वर्जमृतुसंधिषु वापयेदिति॥ ऋतुसंधिष्वेवेति परिसंख्याविधानात्॥ कक्षोपस्थशिखावर्जं भिरेषामितिसमानं॥ इदं जीव न
त्पितृकेणापि कार्यं॥ जीवत्पितृकाधिकारः॥ विना तीर्थं विनायज्ञं माता पित्रोर्मृतिं विना॥ यो वापयति लोयानि स पुत्रः
पितृघातक इति स्मृतेः॥ इदं च वपनं दशमासोर्ध्वं पुनस्तत्तीर्थप्राप्तौ कार्यं नातरो॥ संवत्सरद्विमासौ न पुनस्त्रीन्त्र्यंघ ध

×मातरं पितरं जायां भ्रातरं सुहृदं गुरुं ॥ यमुद्दिश्य निमज्जेत अष्टमांशं लभेत सः ॥ ×

श्रा०वं०द्वि॥ मुंडनं चोपवासं च ततो यत्नेन कारयेत् इति स्मरणात् ॥ द्विमासोनात्संवत्सरादित्यर्थः ॥ क्वचित्स्पष्ट एवता दृशः पाठः ॥

५५ ऊर्ध्वं मब्दाद्विमासोनादिति ॥ एतच्च प्रयागातिरिक्तसर्वतीर्थे ॥ प्रयागे तु विशेषः ॥ प्रयागे प्रतिमासं तु योजनत्रय
मिष्यते ॥ क्षौरं कृत्वा तु विधिवत्ततः स्नायात्सितासिते इति ॥ ततः स्नानं ॥ तीर्थे यमुद्दिश्य स्नानं क्रियते
सोष्टमांशरूपं स्नानजं फलमाप्नोति ॥ तथा च मार्कंडेयपुराणे ॥ पैठीनसिरपि ॥ प्रतिकृतिं कुशमयीं
तीर्थवारिणि मज्जयेत् ॥ मज्जयेच्च मुद्दिश्य सोष्टमांशफलं लभेत् इति ॥ तत्र मंत्रः ॥ कुशोसि कुशपुत्रोसि
ब्रह्मणा विनिर्मितः स्वयं ॥ त्वयि स्नाते स च स्नातो यस्येदं ग्रंथिबंधनमिति ॥ स्नानोत्तरं तर्पणं श्राद्धं ॥ त
त्कालस्तु ॥ श्राद्धदेशनिरूपणे दर्शितः प्राक् ॥ तीर्थश्राद्धं मलमासेपि कार्यं ॥ नित्यनैमित्तिके कुर्यात्प्र
यत्नतः समलिम्लुचे ॥ तीर्थश्राद्धं गजच्छायां प्रेतश्राद्धं तथैव चेति बृहस्पत्युक्तेः ॥ तत्र देवताः ॥ ॥ ५५

विधौ

तातांबात्रितयं सपत्नजननी मातामहादित्रयं सस्त्रिस्त्रीतनयादितातजननीस्वभ्रातरः सस्त्रियः ॥ ताताम्बात्मभगि
न्यपत्यधवयुक् जायापिता सद्गुरुः शिष्याप्ताः पितरो महालयगता तीर्थे तथा तर्पणे ॥ देवीपुराणे ॥ श्राद्धं च तत्र
कर्तव्यमर्घ्यावाहनवर्जितं ॥ भविष्ये ॥ आवाहनं दिग्बंधश्च न तत्र तेषां न विद्यते ॥ हेमाद्रावपि ॥ अर्घ्यमावाहनं चैव द्विजांगु
ष्ठनिवेशनं ॥ तृप्तिप्रश्नं च विकिरं तीर्थे श्राद्धे विवर्जयेत् ॥ पद्मपुराणे ॥ तीर्थश्राद्धं प्रकुर्वीत पक्वान्नेन विशेषतः ॥ आ
मान्नेन हिरण्येन कंदमूलफलैरपि ॥ शूद्रस्तु सर्वदा आमान्नेनैव कुर्यात् ॥ ॥ पिंडद्रव्याणि देवीपुराणादिषु ॥ ॥
च सक्तुभिः पिंडदानं संयावैः पायसेन वा ॥ कर्तव्यमृषिभिः प्रोक्तं पिण्याकेन गुडेन वा ॥ तीर्थश्रौं पिंडप्रतिपत्ति द्ध
माह ॥ ॥ विष्णुधर्मोत्तरे ॥ तीर्थश्राद्धे सदा पिंडान् क्षिपेत्तीर्थे समाहितः ॥ दक्षिणाभिमुखो भूत्वा पित्र्यादिवसा
प्रकीर्तितेपि ॥ अत्र पूर्वोक्ता प्रतिपत्तिर्न भवति ॥ सदा शब्दग्रहणात् ॥ तीर्थश्राद्धमन्यद्वा सपुत्राविधवा नै

श्रा० च० वकुर्यात्॥ सपुत्रा यान कर्तव्यं भर्तुः श्राद्धं कथं च नेति स्मरसंग्रह निषेधात्॥ यतिरपि न कुर्वीत॥ न कुर्यात्सुतकं भिक्षुः ह्रुं श्रो
५६ पिंडोदकक्रियां॥ सर्वं संन्यासयोगेन गृहधर्मादिकं व्रतं॥ गोत्रादिचरणं सर्वं पितृमातृकुलं धनमिति स्मरनेः॥
गयायां विरोषो वायवीये॥ दंडं प्रदर्शयेद्भिक्षुर्गयां दत्वा न पिंडदः॥ दंडस्य स्पृष्ट्वा विष्णुपदे पितृभिः सहमु
च्यते॥ गयायां मुंडपृष्ठे च यूपे कूपे वटे तथा॥ दंडं प्रदर्शयेद्भिक्षुः पितृभिः सह मुच्यते॥ पितामहः॥ चतुर्विधाभि
क्षवस्तु विख्याता ब्राह्मणो मुखात्॥ कुटीचको बहूदको हंसश्चैव तृतीयकः॥ चतुर्थः परहंसश्च संज्ञाभेदैः प्रकीर्तिता इति॥
का· तत्र कुटीचकस्य वृत्तिमाह वृद्धपराशरः॥ कुटीचैनामपुत्रादिभिः कुटीं कारयित्वा कामक्रोधलोभमोहमद
मात्सर्यभयादीन्हित्वा विधिवत्संन्यासं कृत्वा त्रिदंडजलपात्रकाषायवस्त्रधारिणः स्नानशौचाचमनजप
स्वाध्यायब्रह्मयज्ञध्यानतत्परः पुत्रादेरेव भिक्षाकालेऽन्नं यात्रामात्रमुपयुंजानास्तस्यां कुट्यां नित्यं संत ५६

आत्मानं मोक्षयंत इति॥ यात्रामात्रं प्रा[illegible]णसंरक्षणपरिमितं॥ बहूदकस्यापि वृत्तिमाह पितामहः॥ ॥ बहूदकः स विज्ञेयः १८
सर्वसंगविवर्जितः॥ बंधुवर्गं न चेक्षेत स्वभूमौ न च संविशेत्॥ स्वभूमौ स्वगृहे इति॥ हंसधर्मानाह स एव॥ हंसस्तृतीयो
विज्ञेयो भिक्षुर्मोक्षपरायण इति॥ परमहंसधर्मास्स्कांदे॥ कौपीनाच्छादनं वस्त्रं कंथां शीतनिवारिणीं॥ माधुकरमथै
कान्नं परहंसः समाचरेत् इति॥ एषूत्तरोत्तरस्य प्राशस्त्यं बोध्यं॥ यो यः पश्चात्स उत्तम इति पितामहोक्तेः॥ अस्मिंश्च
तुर्थाश्रमे ब्राह्मणस्यैवाधिकारो न क्षत्रियवैश्ययोः॥ चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुतिचोदिताः॥ क्षत्रिय
यस्य त्रयः प्रोक्ता द्वावेकौ वैश्यशूद्रयोरिति॥ याज्ञवल्क्यवचनात्॥ ॥ अथ संन्यासांगश्राद्धं॥ ॥
संन्यासं चिकीर्षुः॥ कुर्याच्छ्राद्धानि चत्वारि संन्यासे स्वस्तुरनाश्रमी॥ आश्रमी कृच्छ्रमेकं तु कृत्वा संन्यासमर्ह
तीति कात्यायनवचनात् कृच्छ्रपूर्वकं संन्यसेत्॥ तिथ्यादि संकीर्त्य शेषदुःखनिवेधवृत्तिनिरति
शयानंदावाप्तिद्वारा परमपुरुषार्थप्राप्तये परमहंसाश्रमाधिकार[illegible]सिध्यर्थं संन्यासमहं करि
ष्ये॥ इति संकल्प्य आचार्यं वृणुयात्॥ अष्टमीमारभ्य पौर्णमास्यां तमथवा संन्यासात्पूर्वेद्युरेव

श्रा॰ चं॰ दैवादिश्राद्धाष्टकं कुर्यात्॥ देवर्षिदिव्यमनुष्यभूतपितृमातृआत्मेति अष्टौ श्राद्धानि प्रथमं सत्यवसुसंज्ञक विश्वेदेवश्राद्ध
५ मंते मातामहश्राद्धं चेति द्वे श्राद्धे॥ एवं दश श्राद्धानि सर्वत्र युग्मसंख्याका ब्राह्मणा भवेयुः॥ अत्र तिलकार्यं यवाः॥ स
र्वत्रोपवीतिना ज्ञेया॥ ॥ तत्रायं प्रयोगः॥ ॥ विंशति ब्राह्मणानुपवेश्य समस्तसंपदिति जपित्वा अनुज्ञां प्रा
प्य युष्माकं सिद्धिं मास्यामि रम्यश्वतीं॥ गर्भवासभयाद्भीतस्तथा तापत्रयातुरे॥ गुहीं षुमिध्यामि परं प्रवे
पदमनायं मे रति॥ प्रार्थ्य दंडवत्प्रणम्य प्राङ्मुख उपविश्य देशकालौ निर्दिश्य संन्यासांगभूतं नां
दीमुखं सदेवमष्टविधं श्राद्धं पार्वणेन विधानेन युष्मदनुज्ञया करिष्ये॥ इति संकल्प्य पुपस्थश्य
सत्यवसुसंज्ञक विश्वेदेवार्थं भवद्भ्यां क्षणः प्रसादनीय इति यथाक्रमं द्वौ द्वावनुमंत्र्य॥ देवश्राद्धे
ब्रह्मविष्णुमहेश्वरार्थं भवद्भ्यां ०१॥ ऋषिश्राद्धे देवर्षिब्रह्मर्षिक्षत्रियर्षिभ्यो भवद्भ्यां ०२॥ दिव्यश्राद्धे
वसुरुद्रादित्यार्थं भवद्भ्यां ०३॥ मनुष्यश्राद्धे सनकसनंदनसनत्कुमारार्थं भ० ०४॥ भूतश्राद्धे पृ ५

थिव्यादिपंचमहाभूतचक्षुरादींद्रियचतुर्विधभूतग्रामार्थं भवद्भ्यां ०५॥ पितृश्राद्धे पितृपितामहप्रपितामहार्थं भव० ०६ मातृश्राद्धे मातृपिता
मही प्रपितामह्यर्थं भव० ०७॥ आत्मश्राद्धे आत्मांतरात्मपरमात्मार्थं भव० ०८॥ मातामहश्राद्धे मातामह मातुः पितामह मातुः प्रपितामहार्थं भव० ०९॥
इति अक्षतोदकैः क्रमेण पादादि दत्वा स्वपादौ प्रक्षाल्याचम्य क्रमेणोपविष्टानां सर्वेषां पुष्पं तेनासनानि दत्वा नांदीश्राद्धे वद्भवद्भ्यां क्षणः क्रियतामोंतथा प्राप्नुतां भवंतो विसु
का प्राप्नुवावेति प्रत्युक्तो गंधपुष्पधूपदीपाच्छादनानि दत्वा भोजनपात्राण्यासाद्यानपरिविष्य हस्ताभ्यां पात्रमालभ्य पृथिवीते पात्रमित्यं
नस्पर्शं कृत्वा तत्र तत्र ब्रह्मविष्णुं देवादीन्स्चतुर्थ्यंतेनानूद्याक्षतोदकमादाय स्वाहेति देवतीर्थेन संस्यज्ञ न ममेति ब्रूयात्॥ ततो ब्र
ह्मार्पणमुक्त्वान्ने ब्राह्मणभोजनेन नांदीश्राद्धदेवताः प्रीयंतामित्युक्त्वा द्विभोजनसमाप्तिपर्यंतं विष्णुसूक्तानि जपेत्॥ भोजनांते नांदी
श्राद्धपिंडप्रदानं करिष्ये इति संकल्प्य दक्षिणतआरभ्योदगपवर्गं नवलेखा लि खित्वा तासु क्रमेण प्रागपवर्गं दर्भानास्त
णीयात्॥ ततः पंचसु स्थानेषु तद्धोमशेषोदकं पितृमातृआत्ममातामहानां स्थानेषु शुश्रूषतां पितर इत्यादिनाक्ष
तोदकं दद्यात्॥ ततो देवादिपंचस्थानेषु तत्तन्नाम्ना प्रागपवर्गं पिंडद्वयं दद्यात्॥ एकैकोमंत्रवत् पिंडो देयस्त्व
द्धीयथापरः॥ सर्वमंत्रेषु कर्तव्यं नांदीमुखविशेषणमिति वचनात्॥ पित्रादिचतुर्षु स्थाने
षु स्वशाखोक्तविधिना पिंडत्रयं दद्यात्॥ जीवत्पितृमात्रादिवर्गकस्तान्परित्यज्य दद्यात्॥

श्रा·च· सर्वत्र पूर्ववद्दत्तोदकं दद्यात्॥ ततः संपूज्य दक्षिणां दत्वा ब्राह्मणान्विसर्जयेत्॥ पिंडानुधृत्य गवादिभ्यो द
५८ त्वा पुण्याहं वाचयित्वेष्टैः सह भुंजीतेति संन्यासांगश्राद्धप्रयोगः॥ ॥अथातिदरिद्रस्य श्राद्धसिद्धिर्हेमाद्रौ
दिष्टभविष्यत्पुराणादिषु॥ अग्निनावा दहेत्कक्षं श्राद्धकाले समागते॥ कक्षं पर्वतदरीति हेमाद्रिः॥ वृद्धवसि
ष्ठः॥ किंचिद्दद्यादशक्तस्तु उदकुंभादिकं द्विजे॥ तृणानि च गवे दद्यात्पिंडान्वाप्य× तस्मिं चोपवसेद्ह्नि जपेद्वा पितृसंहितां॥
यथाशक्त्यानुहातव्यं श्राद्धकाले समागते॥ ×शोभआयपंक्तिः तत्तोय इति× भुनिर्वपेत्॥ तिलदर्भैः पितृंश्चापि तर्प स्नात्वापूर्व न
कमिति॥ प्रचेताः॥ पिंडमात्रं प्रदातव्यमभावे द्रव्यविप्रयोः॥ श्राद्धाहनि तु संप्राप्ते भवेन्निरशनोपि वा॥ वराहपुराणे॥ स
र्वाभावे वनं गत्वा कक्षमूलप्रदर्शकः॥ कक्षामूलप्रदर्शकमिति पाठांतरं॥ सूर्यादिलोकपालानामिदमु
च्चैः पठेदिति॥ न मेस्ति वित्तं न धनं च नान्यच्छ्राद्धोपयोग्यं स्वपितॄन्नतोस्मि॥ तृप्यंतु भक्त्या पितरो मयैतौ भु
जौ कृतौ वर्त्मनि मारुतस्य॥ इत्येतत्पितृभिर्गीतं भावाभावप्रयोजनं॥ यः करोति कृतं तेन श्राद्धं भ ५८
वति भारतेति॥ अथ जीवत्पितृकश्राद्धवर्षिश्राद्धादिकं विस्तरभियान्नोक्तं तन्निबंधांतरे वलोकनीयं॥ ॥

अथ सकलशिष्टवर्यपरिगृहीतो वृद्धं च श्राद्धप्रयोगः॥ ॥उक्तनियमयुक्तः श्राद्धकर्ता श्राद्धदिने तिथ्यादि संकीर्त्य प्रा
चीनावीति अस्म[illegible]त्पितृपितामहप्रपितामहानाममुकशर्मणाममुकगोत्राणां वसुरुद्रादित्यस्वरूपाणामन्नेन हवि
षा पार्वण[illegible] विधिना श्राद्धं करिष्य इति संकल्प्योपवीती पवित्रं बिभृयात्॥ तत्र मंत्रः॥ पवित्रवंतः परिवाचमा
सते॰ इत्यृक्॥ ततो ब्राह्मणान्निमंत्रयेत्॥ तत्र प्राङ्मुखमेकं द्वौ वा विश्वेदेवस्थाने॥ उदङ्मुखमेकं त्रीन्वा पितृस्था
ने॥ अस्मत्पित्रादीनां श्राद्धेषु पुरूरवार्द्रवसंज्ञकविश्वेदेवस्थाने त्वामहं निमंत्रये॥ दैवे क्षणः क्रियतामिति
ब्रूयात्॥ ॐ तथेतीतरः प्रतिब्रूयात्॥ ततः कर्ता प्राप्नोतु भवान्प्राप्नवानीतरः॥ ततः कर्ता प्राचीनावी
ति अस्मत्पितृपितामहप्रपितामहानाममुकशर्मणाममुकगोत्राणां वसुरुद्रादित्यस्वरूपाणां स्थाने
त्वामहं॰ पित्र्ये क्षणः क्रियतां॥ ततः कर्तोपवीती॥ अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः॥ भवितव्यं
भवद्भिश्च मया च श्राद्धकर्मणि॥ सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः॥ भवितव्यं भवद्भिर्नो
द्यतने श्राद्धकर्मणि॥ इति पठित्वा श्राद्धाधिकारसिद्ध्यर्थं पुरुषसूक्तजपमहं करिष्ये॥ ॐ सहस्रशीर्षा॰
१०। अतो देवानुचीवोहमा॰ अपवित्रः पवित्रो वेति॥ ततो ब्रह्मदंडार्थं हिरण्यं सतिलकुशं वा ब्राह्मणाग्रेनि

श्रा॰ चं॰ निधाय॥समस्तसंपत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः॥अपारसंसारसमुद्रसेतवः पुनंतु मां ब्राह्मणपाद
५८ पांसवः॥आपद्घनध्वांतसहस्रभानवः समीहितार्थार्पणकामधेनवः॥समस्ततीर्थांबुपवित्रमूर्तयो रक्षंतु मां
ब्राह्मणपादपांसवः॥विप्रौघदर्शनात्क्षिप्रं क्षीयंते पापराशयः॥वंदनान्मंगलावाप्तिरर्चनादच्युतं पदं॥आधि
व्याधिहरं नृणां मृत्युदारिद्र्यनाशनं॥श्रीपुष्टिःकीर्तिदं वंदे विप्रश्रीपादपंकजं॥इति प्रदक्षिणीकृत्वा प्राचीनावी
ती पितृश्राद्धं कर्तुं ममाधिकारसंपदस्त्विति भवंतो ब्रुवंतु॥अस्तु श्राद्धाधिकारसंपदिति॥ब्राह्मणैरनुज्ञा
तो यज्ञोपवीती तिथ्यादि संकीर्त्य दक्षिणामुखः प्राचीनावीती सव्यं जान्वाच्य अस्मत्पित्रादीनां पूर्वोपक्रांतं श्रा
द्धं सुभदनुज्ञया सद्यः करिष्ये॥कुरुष्व॥उपवीती स्वागतं॥सुस्वागतं॥आगच्छंतु महाभागा विश्वेदेवा महाबलाः
॥ये यत्र विहिता श्राद्धे सावधाना भवंतु ते॥मया निवेदिताः पूर्वं पितरो ये महाबलाः॥आश्रित्य पितृकार्याणि
सावधाना भवंतु ते॥इति जपित्वा प्रांगणाद्दैवपाद्यार्थं चतुरस्रं मंडलं निहितगंधपुष्पयवकुशं प्रादेशमात्रं
वर्तुलं मंडलं निहितगंधपुष्पतिलकुशं गोमयेन विधाय सव्यं प्राङ्मुखः प्राङ्मुखं वैश्वदेविकद्विजमुपवेश्य तत्
पादौ मंडले निधाय नमोऽस्त्वनंताय इति संपूज्य पुरूरवार्द्रवसंज्ञकविश्वेदेवाः इदं वः पाद्यमिति देवतीर्थेन ५९

पाद्यं दत्त्वा पवित्रं निधाय शंनोदेवीति पादौ प्रक्षाल्य तदपो मूर्ध्नि क्षिप्त्वोपवीती पवित्रं विसृज्य मंडलोत्तरतो ब्राह्मणान्दक्षि
णाचमय्य स्वयं द्विराचम्य भोजनस्थाने प्राङ्मुखं वैश्वदेविकब्राह्मणं भूर्भुवः स्वः समाध्वमिति हस्तमादायोपवेश्य प्राची
नावीती पित्रार्थमुदङ्मुखं तथैवोपवेश्योपवीती देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च॥नमः स्वाहायै स्वधायै
नित्यमेव नमो नमः॥इति त्रिर्जपित्वा तिथ्यादि संकीर्त्य प्राचीनावीती अस्मत्पितृपितामहप्रपितामहानामि सौकी सदैवं पु
सपिंडं पार्वणविधिना क्षयाहश्राद्धं युष्मदनुज्ञया सद्यः करिष्ये॥कुरुष्वेति तैरुक्तः॥तदंगतिलोदकादि करिष्ये
अं ॥तिलोदकयवोदकं च कृत्वा॥अपहता असुरा रक्षांसि पिशाचा ये क्षयंति पृथिवीमनु॥अन्यत्रैतो गच्छंतु यत्रैतेषां
गतं मन इति तिलानवकीर्य॥उदीरताम॰ हवेष्विति जपित्वा दर्भैर्भक्षसानानि संप्रोक्ष्य॥सर्वे पाकाः शुचयः श्राद्ध
योग्याः भवंतु॥दृष्टदृष्टिदोषाद्युपहतिर्नश्यतु॥उपहाराणां पवित्रतास्त्विति तैरुक्ते॥श्राद्धभूमौ गयां ध्यात्वा ध्यात्वा देवं
गदाधरं॥वस्वादींश्च पितॄन्ध्यात्वा ततः श्राद्धं प्रवर्तये॥प्रवर्तयेति तैरनुज्ञातो देवार्चनं कुर्यात्॥उत्तरामुखं अपोद
त्त्वा॥पुरूरवार्द्रवसंज्ञकविश्वेदेवस्थाने क्षणः क्रियतां॥ॐ तथा प्राप्नोतु भवान्प्राप्नवानि॥अपो दत्त्वा॥युग्मास्वय
कु॰ गन्वानपु रूरवार्द्रवसंज्ञकानां विश्वेषां देवानामिदमासनमिति दक्षिणतो दद्यात्॥आस्यतां धर्मोसीति प्रसुक्तो अ

श्रा॰ वं॰
६०

पोदत्वार्घ्यं नासादयेत्॥ भुवि प्रागग्रान् दर्भानास्तीर्य तेषु न्युब्जं उदकसंस्पृ पात्रद्वयं निधाय पश्चुस्थोत्तानीकृत्य त
दुपरि द्वौ द्वौ कुशौ प्रागग्रौ निधाय तस्मिन्नप आसिच्य शंनोदेवीरभिष्टय इति सकृदनुमंत्र्य यवोसि धान्यराजो वा
रुणो मधुसंयुतः॥ निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृतं इति प्रतिपात्रं मंत्रावृत्त्या यवानोप्य गंधपुष्पाणि प्रक्षिप्य
देवपात्रे संपन्नेस्तु संपन्ने इत्यभिमंत्र्य॥ पुरूरवार्द्रवसंज्ञकान् विश्वान्देवानभवत्स्वावाहयिष्ये॥ इति वैश्वदेवि
कं द्विजं पृष्ट्वा आवाहयेत्युक्तः ततो विश्वेदेवास आ॰ इत्यृचं पठन् प्रदक्षिणजानुं वामहस्तेन गृहीत्वा विप्रस्य
दक्षिणपादादि मूर्धांतं यवान् विकिरेत्॥ ततो विश्वेदेवाः शृणुतेम॰ इत्यृचं॥ आगच्छंतु महाभागा॰ इति द्वि
रूपस्थाय पुरूरवार्द्रवसंज्ञका विश्वेदेवाः स्वाहार्घ्याः संत्वर्घ्या इत्युक्ते अपो दत्वा पात्रस्थं कुशादयं विप्रकरे
प्रागग्रं दत्वा वामहस्ते गृहीतार्घ्यपात्रजलं दक्षिणपाणिना देवतीर्थेन पुरूरवा॰ देवा इदं वो अर्घ्यमिति द
द्यात्॥ अस्त्वर्घ्यमिति प्रत्युक्ते ततः आपोयादि आ आपः पृथिवि संबभूवुर्या अंतरिक्ष्या उत पार्थिवी॥
र्याः॥ हिरण्यवर्णा यज्ञियास्तान आपः शंस्योना भवंतु॥ इत्यनुमंत्र्य अपो दत्वा पुरूरवा॰ देवाः अमी ४०
वो गंधाः स्वाहा नमो नमम सुगंधाः॥ पुरूरवार्द्र॰ इमानि पुष्पाणि स्वाहा॰ सुपुष्पाणि॥ पुरूर॰ एषवो धूपः

इदंधौ

स्वाहा न॰ सुधूपः॥ पुरू॰ एषवो दीपः स्वाहा॰ सुदीपः॥ पुरू॰ आच्छादनार्थे वस्त्रं स्वाहा॰ स्वाच्छादनं॥ युवा सुवासाः
स्वकु॥ एतेत्र गंधपुष्पधूपदीपाच्छादनानाः पंचोपचाराः सर्वे परिपूर्णा भवंतु अर्चनविधेर्न्यूनाति
रिक्तं विधिवदस्तु॥ यस्य स्मृत्या च नुतं॥ प्रमादात्कुर्वं॰ श्रुति॥ विष्णवे नमः॥ ततो युष्मदनुज्ञया पित्रार्घ्यर्च
नं करिष्य इति संक॰ व्यप्राचीनावीति दक्षिणास्य अपो दत्वा स्मत्पितृपितामहप्रपितामहस्थानेक्ष
णः क्रीपतां॥ अस्मत्पि॰ स्वरूपाणामिदमासनमिति वामभागे दद्यात्॥ आ स्पतां धर्मोसि॥ पूर्ववदाग्ने
यी संस्थमर्घ्यत्रयमासाद्य तदुपरि त्रीन्त्रीन् कुशान्संस्थाप्य तत्र जलमापूर्य शन्नो देवी रिति सकृदनुमंत्र्य
प्रत्यर्घ्ये तिलोसि सोमदे॰ वानम इति तिलांदत्वा गंधादि प्रक्षिप्य पितृपात्राणि संपन्नानि सुसंपन्नानि॥ अ
स्मत्पितृपितामहप्रपितामहान्॥ अमुकशर्मणः अमुकगोत्रान् वसुरुद्रादित्यस्वरूपान् भवत्स्वावाहयि
ष्ये॥ उशंतस्त्वा निधीम॰ अत्तवे इति मंत्रं पादिपादपर्यंतं तिलान्विकिरेत्॥ ततो आयंतु नः पितरः सो
म्यासो अग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदंतोधिब्रुवंतु ते वंत्वस्मानिसुपरस्ता

श्रा० चं यापोऽद्यात् ॥ ब ॐ ब्राह्मणपक्षेऽप्युप स्थानमावाहनोत्तरं सकृदेव ॥ उपवीति अस्मत्पितृपिता० स्वरूपाः संपादिता
६१ वः स्वधार्घ्याः संत्वर्घ्याः पात्रस्थादंभात् ब्राह्मणहस्ते निधाय यवामकरसंग्रहीतेन दक्षिणहस्तेन पितरिदं तेऽर्घ्यं
पितृतीर्थेन दत्वा पितामह इदं तेऽर्घ्यं प्रपितामह इदं तेऽर्घ्यं इति पितृतीर्थेन दत्वा या दिव्या आपः पृथिवि संबभू०
विति सर्वत्र तीरपो दत्वा पितामहप्रपितामहपात्रशेषं पितृपात्रे निक्षिप्य ब्राह्मणहस्तदत्तकुशैः पितृपात्र
माच्छाद्य पुत्रकामेन याते जलेन मुखमङ्क्त्वा पितृभ्यः स्थानमसीति मन्त्रेणोत्तरतो न्युब्जमासादयेत् ॥ त
तः प्राचीनावीति अपः प्रदाय विश्वेदेव ॐ धाच्छादनां तं पितृ वर्चनं विधायेत ॥ अत्र गंधेति पूर्ववद्देवोक्ता
पात्रे सादनं कुर्यात् ॥ तत्रादौ यज्ञोपवीती वैश्वदेवि कद्विजभोजनस्थाने गोमयादिना नैर्ऋतीदिशं
मारभ्य ईशानी पर्यंतं चतुरस्रं मण्डलं यवकुशयुतं च विधाय तत्र भोजनपात्राण्युपपात्रसहितान्यासा
द्य प्राचीनावीती पित्र्यर्थद्विजभोजनस्थाने ऐशानीमारभ्य नैर्ऋतीपर्यंतं वर्तुलं मण्डलं तिलकुशा
युतं विधाय पात्राण्यासाद्य रक्षोनिबर्हणार्थं पात्रसमंतात् भस्मपरिधिं कृत्वा ॥ तत्रादौ पित्र्ये प्राचीना राम
× प्रादक्षिण्येन ॥ पुनः नैर्ऋतीं दिशामारभ्य ईशानीपर्यंतं वरु × अप्रादक्षिण्येन पुनरैशानीमारभ्य नैर्ऋ ६१

वीति ॥ पिशंगभृष्टिमंभृणं० निबर्हयेति ॥ विप्रवामहस्तमारभ्य भोजनपात्रस्य परिधिं कृत्वा उपवीति ॥ देवैरक्षा
णो अग्ने० ध्यानं इति विप्रदक्षिणहस्तमारभ्य भोजनपात्रस्य परिधिं कृत्वा आचम्य प्राचीनावीति पितृद्वि
जकरशुद्धिं विधाय उपवीती देवद्विजकरशुद्धिं विधाय अग्नौकरणं कुर्यात् ॥ तद्यथा ॥ विप्रपाणौ करणं वग्नौ
करिष्ये ॥ कुरुष्वेत्युक्तस्तेनोपस्थं कृत्वा वदन धर्मपाणा नमादाय विप्रपाणौ सोमाय पितृमते स्वधा नमः
सोमाय पितृमत इदं० अग्नये कव्यवाहनाय स्वधा नमः अग्नये कव्यवाहनायेदं न मम ॥ उपवीती ततो
घृतेन पात्रमभिघारयेत् ॥ दैवे मूर्धानं दिवो० देवाः प्राची० पित्र्ये आमासु० इहेत् ॥ ततोऽपवीति ॥ स्वयं
पत्न्या दिवानं देव पूर्वं परिविष्याग्नौकरणशेषं शंपित्रादिपात्रेष्ववदत्वा देवपात्रे गायत्र्याभ्युक्ष्य तूष्णीं
परिषिच्य न्यंमुखे नोपस्थितेन दक्षिणेनोत्तानेन चाधस्थितेन सव्येन पाणिना पात्रमारभ्य ॥ पृथिवी
ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृतं जुहोमि स्वाहा ॥ ब्राह्मणानां त्वा विद्यावतां प्राणा

श्रा० चं पानयोर्जुहोम्यक्षितमसिमैषां क्षेष्टा अमुत्रामुष्मिं लोके ॥ इत्यभिमंत्र्य इदं विष्णुरुपांसुरे ॥ विष्णो हव्यं रक्षस्वेति विप्रांगु
६२ ष्ठमूलमन्नेनिवेश्य यवोदकमादाय ॥ पूरूरवा ॰ र्द्रवसंज्ञक विश्वेदेवादे ॰॰व ताइदमन्नं हविर ये ब्राह्मणआह
वनीयार्थे स्वयं भूमिर्गया ॰ अयं भोक्ता गदाधर इदमन्नं ब्रह्मेदं सौवर्णपात्रस्थं मक्षय्यवटछायेयं ॥ पूरूर०
विश्वेभ्योदेवेभ्यः इदमन्नमस्तु रूपं परिविष्टं परिवेष्यमाणं चातृप्तेः स्वाहा हव्यं नममेति दक्षिणभागे जलं क्षिपे
त ॥ येदेवा सो० षध्वं ॥ नमोदेवेभ्य इत्युपस्थाय प्राचीनावीती सव्यं जानु अपित्रपात्रस्थमन्नं गायत्र्या स्वस्थ्य
नृष्णीं परिषिच्योत्तानेनाधः स्थितेन दक्षिणेनाधोमु खेनोपस्थितेन सव्येन पितृपात्रमालभ्य पूर्ववत् पृथिवी
तेइत्यादि कुर्यात ॥ तत्रायं विशेषः यवोदकस्थाने तिलोदकं स्वाहा स्थाने स्वधा हव्ये कव्यं ॥ सौवर्णे राजतेपु
रूरवार्द्रव स्थाने पितृपितामहप्रपितामहा देवताः विश्वेभ्यो देवेभ्य इत्यस्मिन स्थाने पितृपितामहप्रपिता
महेभ्योमुकशर्मभ्यो मुकगोत्रेभ्यो वसुरुद्रादित्यस्वरूपेभ्य इति ॥ येचेह पितरो० जुषस्वेत्युपस्थायापवी ६२
ब्रह्मार्पणं० प्रसीदतु येषामक्ष ॰व॰ य्यातृप्तिरस्तु ॥ तत्सत् ब्रह्मार्पणमस्तु ॥ एको विष्णुर्व्ययः ॥ अनेन ॥ राम
मुद्दिश्यतेषा

ब्राह्मणभोजनेनास्मत्पितृपितामहप्रपितामह स्वरूपी जनार्दनवासुदेवः प्रीयतां ॥ ईशानविष्णु कमलासन कार्त्ति
केयोवन्हित्रयाकरजनीशगणेश्वराणां ॥ क्रोधाचामलैंद्रकेलेंद्रनकश्यपानांपादान्नमामिसततं पितृमुक्तिहे शो
तोनितिसव्याहृतिकां गायत्रीं मधुमतीश्च जपित्वामध्विति स्तकोपितृदेवान् ध्यात्वा अपोशानार्थमुदकं दत्वो
वलिदानवर्जमन्नोपस्तरणमसीति विप्रैस्तस्मिन्नीते कर्ता [redacted] प्राणाहुतिमंत्रान्पठेत् ॥ श्रद्धायां प्राणेनि
विष्टोमृतं जुहोमि शिवोमाविशाप्रदाहाय प्राणाय स्वाहा ॥ एवं सर्वत्र उक्तांते यथासुखं जुषध्वमिति वदे
त ॥ ततो अपेक्षितं याचितव्यं त्याज्यं चैवानपेक्षितं ॥ उपविश्य सुखं नैभोक्तव्यं स्वस्थमानसैरिति प्रार्थ्य व
यथाशक्ति गायत्री जपपूर्वकं श्राद्धसूक्तानि पठेत् ॥ ततो भोजनांते पुरूरवा० देवाः तस्मास्थ्यः प्राचीना
वीती अस्मत्पित्राद्याः सर्वे पितरस्तृप्तास्थः तत्सास्मदस्तु क्तेमधुवाता ऋतेके २ ॥ अन्नमीम० श्राद्धे
संपन्नं सुसंपन्नं त्रोषमन्नं किं क्रियतामिति इष्टैः सह भुज्यतामिति [redacted] प्रतिश्रुतवचनो उत्तरापोशनं दत्वा
चांतेषु विप्रेषु पिंडदानं कुर्यात ॥ तद्यथा ॥ द्विजो च्छिष्टांतिके भूमिं प्रोक्ष्य धौतापसव्यः पितृप्रीत्यर्थं

श्रा॰ चं॰ पिंडदानं करिष्ये॥ उपवीति अपहता असुरा रक्षांसि वे[redacted] दिषदः त्याग्नेयी संस्थां ऽरेखां स्पेय न कुशमूलेन वोल्लि
६३ खाद्रिखामभ्युक्ष्य दक्षिणाग्रैः स सदा छिन्नैर्दर्भैरास्तीर्य आग्नेयो करणशेषं संमिश्रेण आहूतेन कपिष्य प्रमा
पाहृद्धान् पिंडान् स्तीत्वा प्राचीनावीती शुंधंतां पितरः शुंधंतां पितामहाः शुंधंतां प्रपितामहा इति कुशेषु ति
लोदकं दत्वा पिंडमादाय एतत्ते अस्मत् पितः अमुकशर्मन् अमुकगोत्र वसुरूप ये च त्वामत्रानु॥ इति पितृतीर्थेन
मुकुशर्मणे ५ थैन कुशोपरि पिंडं निधाय अस्मत् पित्रे अमुक गोत्रोय वसुरूपाय यं पिंडस्वधा नमो नमम ये च त्वा मत्रा
नु तेभ्यश्च गयायां श्रीरुद्रपादे दत्तमस्तु॥ तथा पितामहप्रपितामहाभ्यां दत्वा कुशमूले हस्तं निमृज्य अ यैस्मेऽइं
त्रपितरो मादयध्वं यथाभागमा[redacted] वृषायध्वमिति सनुमंत्र्य स[redacted] आवेड्डुदं ऽऽरेस यथाशक्ति प्राणा
नायम्य तथैव पुनः [redacted] पर्यावृत्य अमीमदंत पितरो यथा[redacted] मावृषायिषतेति पुनरनुमंत्र्य
उपवीति पिंडशेषमवघ्राय हस्तं प्रक्षाल्य प्राचीनावीती पिंडेषु तिलोदकं शुंधंतां पितर इत्यादि दि ६३
दत्वा पिंडपात्रेष्वग्निबलं कृत्वा अस्मत् पितः अमुकशर्मन् भ्यं क्ष अस्मत् पितामह अ॰ अस्मत् प्रपितामह इति तैले

ने भाग ३

पिंडेषु निक्षिप्य तथैवांजनमंक्ष्वेति दत्वा एतद्वः पितरो वासो मा नो तो[redacted] न्यत्पितरो युंग्ध्वमिति दशासूत्रं तेषु द
द्यात्॥ कुत्राभिहृध्यर्थं सव्येन पिंडपूजां करिष्य इति संकल्प्य॥ पिंडस्थेभ्यः पितृभ्य इति मंत्रेण पिं
द्र डांसंपूज्य नमस्कृत्य स प्राचीनावीतिं सुप निह्नुत॥ नमो वः पितर इषे नमो वः पितर ऊर्जे नमो वः पितरः शुष्माय नमो वः पित
रो घोराय नमो वः पितरो जीवाय नमो वः पितरो रसाय॥ स्वधा वः पितरो नमो वः पितरो नम एता युष्माकं पितर इमा अ
ऊ स्माकं जीवा वो जीवंत इह संतः स्याम॥ मनो न्वाह्वामहे इति त्रिः सभिश्वोपस्थाय॥ परेतन पितरः सोम्यासो गंभीरेभिः
पथिभिः पूर्विणेभिः॥ दत्वायास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं नियच्छत॥ इत्याग्नेयी प्रति पिंडान् प्रवाह्य पिंडान् द्वास नं ङानु
यिष्ये। इत्युक्त्वा तद्दिशोपरि तिपिंडान् जलादौ क्षिप्त्वा पिंडस्थाने रेखां तिरस्कृत्वि ति जलं प्रोक्ष्य विकिरं दद्यात्॥ उपवीति॥
आदौ वैश्वदेविक ब्राह्मण संनिधौ प्रोक्षितेभूमौ कुशोपर्यन्नमादाय असोमपाश्च ये देवा यज्ञभागविवर्जिताः॥ तेषा
मन्नं प्रदास्यामि विकिरं वैश्वदेविकं॥ इति मंत्रेणाक्षिपेत्॥ ततः प्राचीनावीति अ संस्कृत प्रमीताश्च त्यागिनो या कु
लस्त्रियः॥ दास्यामि तेभ्यो विकिरमन्नं ताभ्यश्च पैतृकं इति तथैव पितृद्विजपात्रसन्निधौ रत्वोच्छिष्ट पिंडं दद्यात्॥
विप्रोच्छिष्टाग्रे दक्षिणाग्रकुशेषु॥ ये अग्निदग्धा ये अनग्निद॰ य स्व इति पिंडं क्षिप्त्वा॥ ये अग्निदग्धाः कुले जाता ये प्यद

ने

श्रा० चं० ग्धाः कुलेमम॥भूमौरजेनन्त्र्यंतु त्र मायांतु प रागतिं॥एतेनमंत्रेण तन्मध्ये तिलांबूनि षिंचेत॥ततोआ चम्य पवित्रंस्य
६८ को सपवित्रकरोदेवद्विजहस्तेसु प्रोक्षितमस्तु॥अस्तु सुप्रोक्षितं॥शिवाआपःसंतु॥संतुशिव आपः॥सौमन
स्यमस्तु॥अस्तु सौमनस्यं॥अक्षतंचारिष्टं चास्तु॥अस्त्वक्षतमरिष्टंच॥दीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टि
श्चास्तु॥एवमपसव्येनपित्रब्राह्मणहस्तेषु पिकृत्वा॥अघोराःपितरः संतु॥संत्वघोराःपितरः॥अमुकशर्मा
हम भिवादये॥उपवीति॥अस्मद्गोत्रंवर्धतां॥स्वस्तिवर्धतां॥गोत्रंतानक्षतान् शिरसिधृत्वो छिष्टभा
जनानि चालयित्वा चेम्यपुरूरवाद्र्व० देवेभ्यः स्वस्तीति ब्रूतमितियवोदकं देवद्विजहस्तेदत्वास्वस्तीत्युक्ते
अस्मत्पितृपितामहप्रपितामहेभ्यः स्वस्ति० पुरूरवाद्र्व संज्ञकानां यद्दत्तंश्राद्धं तदक्षय्यमस्तु॥अस्त्व
क्षय्यं॥प्राचीनावीती अस्मत्पितृपि० स्वरूपाणां यद्दत्तंश्राद्धं०॥ततःप्रथमन्युब्जपात्रमुत्तानं कृत्वो पूर्वो
क्तिअस्मत्पितृ [illegible] पितामहप्रपितामह स्थानेउपविष्ट ब्राह्मणेभ्यः श्राद्धसांगुण्यार्थंयथाशक्ति रजतंदक्षि राम
णात्वेनसंप्रददे॥दक्षिणाःपांतु॥पांतुदक्षिणाः पुरूरव उपविष्टायब्राह्मणाय यथाशक्ति सुवर्णंदक्षिणा० ६८
य

स्वधांवाचयिष्येवाच्यतां॥अस्मत्पितृपितामहप्रपितामहेभ्यो यथा नामगोत्रेभ्यो वसुरुद्रादित्य स्वरूपेभ्यः स्वधोच्यतां॥अस्तुस्व
धा॥स्वधा संपद्यंतां॥संपद्यंतां स्वधा॥विश्वेदेवाःप्रीयंतां॥प्रीयंतां विश्वेदेवाः॥पितरःप्रीयंतां॥प्रीयंतां पितरः॥स्वस्ती
ति पिंडेषु शेषतिलान्विकीर्य शांतिरस्त्विति जलंक्षिप्त्वा॥वाजेवाजे० यानेः॥उत्तिष्ठपितरो विश्वेदेवैः सहेतिकुशेन विप्रहस्त
स्पर्शनं॥आमावाज०गम्याः॥इति विप्रप्रदक्षिणां कृत्वा विप्रहस्ते षक्षतपुष्पाणि दत्वाप्रार्थयेत॥दातारो नोभिवर्धंतांवे
दाःसंततिरेवनः॥श्रद्धाचनोमाव्यगमद्बहुधेयंचनोस्तु॥अन्नंचनोबहुभवेदतिथींश्चलभेमहि॥याचितारश्चनः संतु माचयाचिष्मकंच
न॥ततोब्राह्मणाः॥दातारोवोभिवर्धंतां॥वेदाःसंततिरेववः॥श्रद्धाचवोमाव्यगमद्बहुधेयंचवोस्तु॥अन्नंचवोबहुभवेदतिथींश्चलभ
ध्वं॥याचितारश्चवःसंतुमाचयाचिढ्वंकंचन॥इत्याशिषंगृह्य॥स्वादुषंसदः पि० ईशत॥इतिकृत्यं॥इहैवस्तंमा०गृहे॥आयुःप्रजांध
नंविद्यां स्वर्गंमोक्षंसुखानिच॥प्रयच्छंतुतथाराज्यंप्रीतानृणां पितामहाः॥एताःसत्याआशिषः संत्विति पठित्वा तानक्षता
न्शिरसिधृत्वा॥अद्यमेसफलंजन्मभवत्पादाब्जवंदनात॥अद्यमेवंशजाःसर्वेयातावोनुग्रहाद्दिवं॥यत्तुशाखा
दिदानेन क्लेशिता यूयमीदृशाः॥तत्क्लेशजातचित्तास्तु विस्मृत्यक्षंतुमर्हथ॥इत्याभ्यां मंत्राभ्यां विप्रपादानुप
स्पृश्य प्रणम्य च॥मंत्रहीनं क्रियाहीनं भक्तिहीनं द्विजोत्तमाः॥श्राद्धं संपूर्णतांयातु प्रसादाद्भवतांमम इतिप्रा

×विरचित्र

श्रा० चं० र्पयेत् ॥ ततः संपूर्णमस्त्विति तैरुक्ते यस्य स्मृत्येति पठित्वा ॥ नेन श्राद्धकर्मणा सर्वपितॄणामक्षय्यात्तिरस्तु ॥ गयाकृ
६५ तश्राद्धफलमस्त्विति विप्राः ॥ वसिष्ठासः पि॰ सदानः ॥ इदं पितृभ्यो नमो अ॰ रो स्तव्यं ॥ आ सीमोतमनु व्रज्य वैश्व
देवं हुत्वा द्वैः सह भुंजीत द्वितीयदिने श्राद्धांग तर्पणं कुर्यात् ॥ इति दिवाकरभट्ट तायां श्राद्धचंद्रिकायां बहू
चश्राद्धप्रयोगः ॥ ॥ इदानीं केवलगृह्याग्निमतः पिंडपितृयज्ञमतिषक्तो दर्शश्राद्धप्रयोगो भिधीयते ॥ तत्रगृह्यप
रिशिष्टं ॥ आहिताग्निः पिंडपितृयज्ञं शत्वोक्तरीत्यनाहिताग्निस्तु तदितरेणात्यतिषज्यते ॥ यथा दो पितृयज्ञो यावदिध्मा
धानादथ पार्वणं ब्राह्मणपृष्ठौ चाच्छादनांते पुनः पितृयज्ञं आ मेक्षणानुप्रहरणात् पुनः पार्वण मानमिंत्रानाद्यथापि
यशेषं क्रमेण समापयेदित्येषव्यतिषंग इति ॥ ॥ अथ प्रयोगः ॥ ॥ गृह्याग्निमान् चतुर्दश्यां सायंहोमानंतरम
मावास्यामेव प्रातर्होमानंतरं यथासामर्थ्यं ब्राह्मणान्निमंत्र्य तानाकार्यस्नातोध्वृतपवित्रः प्राणानायम्य देशकालौ
संकीर्त्य प्राचीनावीती त्यन्वाचितसव्यजानुः पितृपितामहप्रपितामहानां सपत्नीकानां मातामहमातुः पिता
महमातुः प्रपितामहानां सपत्नीकानां पार्वणश्राद्धं पिंडपितृयज्ञं चव्यतिषंगेन करिष्य इति संकल्प्य ब्राह्मणानिमंत्र राम
णादि [illegible] द्वितीयसंकल्पांते कृत्वा विप्रान्संनिधाप्यौपासनाग्निं प्रज्वल्याग्नेय्यभिमुखोऽग्निं ध्यात्वाग्नेयीनारभ्य ६५

प्रदक्षिणं सकृद्वपरिसमुह्याग्नेय्यग्रकैर्दर्भैः प्रदक्षिणं परिस्तीर्य तथैव पर्युक्ष्याग्ने रीशान्यां वायव्यां वाग्नेय्यग्रका
न् कुशानास्तीर्य प्रोक्ष्य तत्र चरुस्थाली शूर्पस्फ्योलूखलमुसलस्रुवधुवाकृष्णाजिनसहेराछिन्नबर्हिरिध्ममेक्षण
कमंडलूंस्त्वा रव्या निपात्राणि न्यक् बिलान्येकैकेशः अग्नेयीसंस्थान्यासाद्य तानानिकृत्वा कमंडलूदकेन तानि प्रो॥
क्ष्य गृहीतचरुस्थाली शूर्पोग्ने र्दक्षिणतास्थितं व्रीहिमच्छकटं दक्षिणत आरुह्य शूर्पनिहितोस्थाली व्रीहिभिरापूर्य
यथा स्थालीमुखप्रदेशाद्व्रीहयः शूर्पे निपतंति तथा तां निमृज्य स्थालीमुखप्रदेशतः पतितान्व्रीहीन्छकटे प्रास्याग्नेः
पश्चिममग्नेय्यभिमुख्या स्तिष्ठसाप त्न्यावहतान्सकृत्फलीकृतानविविच्य सकृत्प्रक्षालितान्जीवतंडुलान्
श्रपयित्वा चरुमुद्वास्यैवाग्नेरेकतः प्रदीप्तमुल्मुकं गृहीत्वाग्नेराग्नेयोदिशि कृत्वेशुचि स्थंडिले ॥ ये रूपाणि
प्रतिमुंचमाना असुराः संतः स्वधया चरंति ॥ परापुरो निपुरो ये भरंत्यग्निष्टाल्लोकात्प्रणुदात्वस्मादिति तत्प्रणी
तारव्यमग्निं निधायाग्नेय्यग्रकैः कुशैः परिस्तीर्यग्न्यभिमुखो तिप्रणीतोपासनयोर्मध्ये सव्योत्तरहूयपाणि
विध्वतेन स्फ्येन दर्भमूलेन वाग्नेयीसंस्थलेखावाद्यमा हतेन अपहता असुरा रक्षांसि वेदिषद इति मंत्रे

५ देशाद्यग्नीवमास्तीर्णे कृष्णाजिने उलूखलं निधाय तत्र स्थालीस्थान्व्रीहीन्निधाया×

श्रा·चं· णोल्लिख्य तदद्भिरभ्युक्ष्य सकृदाच्छिन्नं बर्हिर्द्वयेनाच्छाद्य विलापितानुत्सृताज्यप्रणीध्रुवमग्ने दक्षिणतो दर्भेष्वासा
घ संमृष्टेन स्रुवेणा ध्रुवाज्यमादाय चरुमभिघार्योदगुद्वास्याप्रणीताग्नेः पश्चिमतः कुशेष्वासाद्य तद्दक्षिणतोऽन्य
६६ जनोजनकशिपूपबर्हणान्यासादयेत् ॥ ततः स्वागतप्रश्नादिपात्राणामभितो भस्मप्रक्षेपांतं पार्वणवत्कृत्वापि
तृयज्ञचरोरन्नमुद्धृत्य सघृतान्नं कृत्वा प्राचीनावीत्यग्नौकरिष्ये इति पित्र्यर्थद्विजान्पृष्ट्वा क्रियतामिति तैरनुज्ञातस्तिप्र य
णीतास्पश्चादुपविष्टस्समर्चयित्वा इध्मं पितृतीर्थेन तूष्णीं तस्मिन्नग्नौ क्षिप्त्वा स्रुवेण ध्रुवाज्यमादाय मेक्ष
णोपस्तीर्योद्धृत्य चरुं द्विधा त्रिधा वा विभज्य मेक्षणेन यथाप्रवरं द्विवारं त्रिवारं वावदानसंपदा सोमा
य पितृमते स्वधा नमः इत्यप्रणीताग्नेर्दक्षिणभागे पितृतीर्थेन हुत्वा सोमाय पितृमत इदं न मम इति त्यजेत् ॥ पु
नस्तथैवावदायाग्नये कव्यवाहनाय स्वधा नमः इत्यग्नेरुत्तरभागे हुत्वाग्नये कव्यवाहनायेदं न ममेति
सकृदुपवीती मेक्षणं तूष्णीमग्नावनुप्रहृत्य सपरिषेचनाद्युत्तरापोशनार्थोदकदानांतं पार्वणवत्कृत्वा राम
द्विजैरुत्तरापोशाने कृते पिंडपितृचरुशेषेणाभिश्रेण श्राद्धान्नशेषेण पिंडार्थमुद्धृतेन मधुसर्पि ६६

स्तिलयुतं पिंडषट्कं कृत्वा ध्रुवाज्येनाभिघार्य प्राचीनावीती आन्वाच्य वामजानुः पूर्वं परिस्तृतबर्हिषोः शुंधंतां पितृ
रः । सादिभिः षण्मंत्रैरासादितकमंडलुजलमाग्नेय्यवर्गं पूर्ववं निनीय पिंडदानानुशापनादि पुनरनुमंत्रणां
तं कृत्वोपवीती चरुशेषमाघ्राय प्राचीनावीती पुनर्निनयनादि वासोदानांतं कृत्वा कशिपूपबर्हणेनि
वेद्य पिंडार्चनापिंडप्रवाहणांतं कृत्वा ॥ अग्ने तमद्याश्वं न० ॐ हेरितिमंत्रेणोपसनाग्निं प्रसेस्य ॥ यदं
तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिंसिम ॥ अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंचतु करो
तु मामनेहसमिति मंत्रेण गार्हपत्यरते नोपस्थाय पिंडनमस्कारादि पिंडनिक्षेपणांतं कृत्वा मध्यमं पिंडद्व
यं पत्नीं प्राशयेत् । वीरं मे दत्त पितरः × हि × इत्यादाय पत्न्येव दद्यात्सा च आधत्त पितरो गर्भं कुमारं पुष्करस्र
जं ॥ यथारमरपा असदिति मंत्रेणावारद्वयपरिगृतेन क्रमेण पिंडद्वयं प्राश्नीयात् ॥ ततः श्राद्धकर्ता हुं द्वशो
यज्ञपात्राण्युत्सृज्याविशिष्टयज्ञपात्रं तेनहविर्द्वं संयोपोत्सृज्य गृह्याग्निपरिस्तरणानि विसृज्याग्निमलं
कुर्यात् ॥ एवं पितृयज्ञं समाप्य प्रक्षालणानाचमय्य विकिरदानादि श्राद्धशेषं समापयेत् ॥ ॥ अत्रेश्र

श्रा० च० पणहोमयोरधिकरणविकल्पमहापस्तंबः ॥ सोयमेवं विहित एवानाहिताग्नेरौपासने श्रपणं होमश्चातिप्र
६७ णीते वा जुहुयात् ॥ इति अत्र व्याख्यातवान् रुद्रदत्तभाष्यकारः ॥ अनाहिताग्नेर्दक्षिणाग्निस्थानीय औ
पासने श्रपणं होमोऽपि वतः ॥ अथवा औपासन एव श्रपयित्वा ततोऽग्निं दक्षिणाग्निं संचं प्रणीय तस्मि
ञ्जुहुयादित्यर्थ इति ॥ आश्वलायनैस्त्वतिप्रणीत एव होम इति बहुग्रंथकारसंमता । इति प्रणीतेऽग्ना
५५ विध्ममुपसमाधाय मेक्षणेनादायावदानसंदा जुहुयादिति गृह्यपरिशिष्टव्याख्यान्मातुः पिता म
महाभट्टश्रीनारायणपदपाथोजाभिधाने व्यातिप्रणीत एव होमः कार्यः ॥ अथवा स्वकुलवृद्ध
संप्रदाये विचार्य कार्यमिति ॥ आहिताग्नेस्तु दक्षिणाग्नावेव श्रपणं ॥ होमश्च आसादयेदभिघा
र्य स्थालीपाकं इति श्रौतसूत्रे इति [illegible] क्र । तां दक्षिणाग्नेः पश्चात्स्थापयेदिति व्याख्याना राम
दिसत् ॥ ॥ जीवतंडुललक्षणं मेत्रायणीयवाराहसूत्रे ॥ तुराणा व्रीहयो सेषां बीजमुत्प्ररोहति ॥ तेभ्यो ६७

ये तंडुला जाता विदिते ये जीवतंडुला इति ॥ ॥ इयोपासनाग्निमताः पिंडपितृयज्ञव्यतिषक्तदर्शश्राद्धप्रयो
गः ॥ ॥ अथ माहालयोपयुक्ताः षोडशी श्लोकाः ॥ आब्रह्मणो ये पितृवंशजाता मातुस्तथा वंशभवा म
दीयाः ॥ वंशद्वये स्मिन्मम दासभूता भृत्यास्तथैवाश्रितसेवकाश्च ॥ मित्राणि सख्यः पशवश्च
वृक्षा दृष्टाश्चादृष्टाश्च कृतोपकाराः ॥ जन्मांतरे ये मम संगताश्च तेभ्यः स्वधा पिंडमहं ददामि ॥ पितृवंशे मृता ये च मा
तृवंशे तथैव च ॥ गुरुश्वशुरबंधूनां ये चान्ये बांधवाः स्मृताः ॥ ये मे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः ॥ क्रिया
लोपगताश्चैव जात्यंधाः पंगवः स्तथा ॥ विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम ॥ धर्मपिंडो मया दत्तो ह्य
क्षय्यमुपतिष्ठतु ॥ असिपत्रवने घोरे कुंभीपाके च ये गताः ॥ तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहं ॥ उच्छिन्नकु
लवंश्यानां येषां दाता कुले नहि ॥ धर्मपिंडो मया दत्तो ह्यक्षय्यमुपतिष्ठतु ॥ एते श्लोकाः माहालये पिंडदा
नोत्तरमत्र पितरो मादयध्वमित्यस्मात्प्राक्पठनीयाः ॥ वेणुसंभवनिनादमोहितागोपिकास्तटमुपेत्य या
मुनं ॥ येन सार्धमरमंत सन्नमाम्यहं भजामि वसुदेवनंदनं ॥ प्रसंगाद श्रद्धानां प्रयोगः श्राद्धकर्मणः ॥ वि

श्रा० चं० लिख्यते विशेषोथ तद्धर्मान्मुनिभाषितान् ॥ ॥ आचम्य पूर्वाह्ने तिथ्याद्युच्चार्य उत्तरापसव्यं कृत्वा अस्मत्पितृपिताम
६८ हप्रपितामहानाममुकगोत्राणाममुकदासानां वसुरुद्रादित्यस्वरूपाणां क्षयाहश्राद्धं पार्वणश्राद्धं दैवं सापिंडं नामे
नहविषा दर्भबटौ सद्यः करिष्ये ॥ दर्शादौ तु दर्शश्राद्धमित्याद्यूहः कार्यः ॥ इति संकल्प्य [illegible] अस्मत्पित्रादी
नां श्राद्धे विश्वेदेवस्थाने त्वामहं निमंत्रये ॥ इति दर्भबटौ सयवकुशं दद्यात् ॥ सतिलं कुशं पितृपितामहप्रपि
म तामहानाममुकगोत्राणां वसुरुद्रादिस्वरूपाणां स्थाने त्वामहं निमंत्रये ॥ इति द्वितीयदर्भबटौ दद्यात् ॥ ततो अक्रो
धनैरिति मंत्रं पठित्वा पुरूरवार्द्रवसंज्ञकविश्वेदेवाः स्वागतमिति पृष्ट्वा पुरू० देवाः इदं वः पाद्यमिति पादयोर्दद्यात् ॥ एवम
पसव्येन नामगोत्रोच्चारणपूर्वकं पितृबटाव पि दत्वा अपवित्रः पवित्रो वेति सर्वश्राद्धद्रव्ये कुशतोयं क्षिपेत् ॥ ततोपसव्यं कृ
त्वा ॥ तिला रक्षंतु असुरान् दर्भा रक्षंतु राक्षसान् ॥ पंक्तिं वै श्रोत्रियो रक्षेदिति अतिथिः सर्वरक्षक इति चतुर्दिक्षु तिलान्विकी
र्य सव्येनाग्नौ नांदीनां पवित्रं तास्तिलं तु उच्चार्यापसव्येन त्रिर्देवताभ्यः पितृभ्यश्चेति जपेत् ॥ ततस्तिथ्याद्युच्चार्यास्म ६८
पित्रादीनां दर्शे मातामहानां नांदी चेति विशेषः ॥ उपक्रांते श्राद्धे करिष्य इति संकल्प्य दक्षिणं जान्वा[illegible] पुरूरवा० नामिदमा

ममुकदासाना २

सनं मम इति द्वौ कुशावासनार्थमुपकल्पयेत् ॥ दैवे क्षणः क्रियतामिति कुशं हस्ते दत्वा ओं तथा प्राप्नोतु भवान् ॥ एवमेवापसव्यपूर्वं
[illegible]कं वामं जान्वाच्य पितृपितामहप्रपितामहानाममुकगोत्राणामिदमासनं वो स्वधेति त्रीन्कुशान्वामभागे दद्यात्
॥ एवं च ब्राह्मणपक्षे तु पितुरमुकदासस्यामुकगोत्रस्य वसुरूपस्येति बोध्यं ॥ एवं पितामहप्रपितामहयोरपि ॥
पित्र्ये क्षणः क्रियतां ॥ ततः सव्येन विश्वान्देवानावाहयिष्ये इत्युक्त्वा पुरोधसावाहयेत्यनुज्ञातो आगच्छंतु महा
भागे इति मंत्रेणातानावाहयेत् ॥ एवमपसव्येनास्मत्पितृपितामहप्रपितामहान् अमुकदासान् अमुकगोत्रान् वसुरु
द्रादिस्वरूपान् आवाहयिष्ये इति सर्वं प्राग्वत् ॥ ततः सव्यापसव्याभ्यां गंधादिभिरर्घ्यमेषवो चार्यो नम इति ॥ देव पु ५
पित्रोर्निवेद्य गंधादिभिर्देवपूजां निर्वर्त्य द्विगुणामामान्नं असमर्थः सर्वं वादौ विश्वेदेवाग्रे निधाय यविसोहव्यं र
क्षस्वेति पुरू० देवाः इदं वो आमान्नं सपरिकरं ये यं भूमिर्दाधरोहं भोक्ता हं ब्रह्म गृहीता ब्रह्म ब्रह्मरूपमामेमनः
म कल्पितस्वर्णपात्रस्थेक्षय्यवटछायेयं पुरू० वेभ्यो क्षय्यतृप्त्यर्थं संप्र[illegible] ददे स्वाहा नमो नमम भगया गदाधरः
प्री[illegible]तो भवतु ॥ ततोपसव्येनामुकगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकदासा वसुरुद्रादिस

श्रा० चं० स्वरूपाए नद्वो आमान्नंसपरिकरंगयेयं भूर्गदाधरोभोक्ताहं चअलगृहीताश्रलश्रलरूपमामे मनः कल्पितरजतपा
६९ त्रस्थमक्षय्यवट छायास्थपितृपितामहप्रपितामहेभ्योमुकदासेभ्योमुकगोत्रेभ्यो वसुरुद्रादित्यस्वरूपेभ्योऽइमा
मंसोपस्करं अक्षय्यतृप्त्यर्थं संप्रददे स्वाहा नमोनमम ॥ अमृतरूपेण स्वधा संपद्यतां न मम ॥ इत्तमक्षय्यमस्तु ॥ ग
याकृतश्राद्ध फलमस्तु ॥ ततोअसं स्कृतप्रमीतेभ्यो एषपिंड इति विकिरं निक्षिप्याम पिंडं सोदकं अग्निदग्धेभ्योऽन
ग्निदग्धेभ्यश्चैषउच्छिष्टपिंडोनमइतिकुशेषुदत्वामधुवितित्रिवारंजपेत् ॥ ततः पिंडार्थं वेदिं कृत्वा वामं जान्वा च्याप
व्येन दर्भमूलेन दक्षिणाग्रां लेखामुल्लिख्य तस्यां कुशानास्तीर्य मध्वाज्ययुक्तान् पिंडान् पितृतीर्थेन अमुकगोत्रा
स्मत्पितः अमुकदास वसुरूप एषते पिंडो नमः ॥ १ ॥ अमुकगोत्रास्मत्पितामह अमुकदास रुद्ररूप एषते पिंडो नमः ॥ २ ॥ अमु
कगोत्रास्मत्प्रपितामह अमुक० एषते पिंडो नमः ॥ ३ ॥ इति दद्यात् ॥ ततः पिंडेषु तिलोदकं दत्वा पित्रादिभ्यो नम इति पिंड
षु सूत्रं सम × मर्प्य चंदनादिदक्षिणांते रूपत्वात् तान्संपूजयेत् ॥ ततः सुप्रोक्षितमस्त्विति देवपित्रोः करेज
भ्यो लं दत्वां सव्येन पूरूरवाद्रव संज्ञकैर्विश्वेभ्योदेवेभ्योयद्दत्तं श्राद्धीयमामादित्तं दक्षय्यमस्तु ॥ एवमपसव्येन नाम राम
गोत्राद्युच्चार्य पितृपितामहप्रपितामहेभ्योयद्दत्तमिति मागवत् ॥ ततः पित्रादिभ्यः स्वधोच्यतां ॥ अस्तु स्वधे ६९

त्रिपुरोधाः ॥ ततो देवपित्रोः सुवर्णरजते श्राद्धसादुण्यार्थं दक्षिणाः पांतु इति दक्षिणां दत्वोत्तिष्ठ पितरो विश्वे
विश्वेदेवैः सहेतिउद्वास्य सर्वंनद्याप्र क्षिप्य पुरोधसं प्रदक्षिणीकृत्य प्रणम्य च दक्षिणादानेन तोषयेत् ॥ ततो आमान्ने
न तु शूद्राणां तस्मीतु द्विजपूजनं ॥ होत्वा श्राद्धं तु निर्वाप्य सजातीनाशयेदथेति ॥ इत्यपराशराशरवाक्यात्सजातिभ्योभो
जनं दत्वा स्वयं सुहृद्युतः सह देवभुंजीतिति श्राद्धप्रयोगः ॥ ॥ अथ मृतशय्यादान विधिः ॥ हेमाद्रौ भविष्ये ॥ त
स्मात् छय्यां समासाद्य सारदारुमयीं दृढां ॥ दंतपत्र चितां रम्यां हेमपट्टैरलंकृतां ॥ हंसतूलीप्रतिछन्नां शुभगंडोपधा
निकां ॥ प्रच्छादनपटीगंधधूपदीपादिवासितां ॥ तस्यां संस्थापयेद्धैमं हरिं लक्ष्म्या समन्वितं ॥ मृतशय्यां यां ह
रिस्थाने प्रेतमिति विशेषः ॥ उच्छीर्षके घृतभृतं कलशं परिकल्पयेत् ॥ तांबूलं कुंकुमक्षोदकर्पूरागरुचंदनं ॥ दी
पिकोपानहछत्रचामरासनभाजनं ॥ पार्श्वेषु स्थापयेत्तत्वाद्रव्य समधान्यानि चैव हि ॥ शयनस्थस्य भवति यदन्यदुप
कारकं ॥ भृंगारकरकाद्यं तु पंचवर्णं वितानकं ॥ मंत्रस्तु ॥ यथा न कृष्ण शयनं शून्यं सागरजातया ॥ शय्या ममाप्य
शून्यास्तु तथा जन्मनि जन्मनि ॥ यस्मादशून्यं शयनं केशवस्य शिवस्य च ॥ शय्या ममाप्य० जन्मनि ॥ दत्वै
वं तस्य सकलं प्रणिपत्य विसर्जयेत् ॥ एकादशाहे पितृतथा विधिरेकः प्रकीर्तितः ॥ विशेषं चाप्यराजेंद्र कथ्यमानं

श्रा० चं० निशामय ॥ तेनोपभुक्तं यत्किंचिद्वस्त्रवाहनभाजनं ॥ यद्यदिष्टं च तस्यासीत्तत्सर्वं परिकल्पयेत् ॥ तमेवं पुरुषं हैमं तस्यां सं
७० स्थापयेत्सदा ॥ पूजयित्वा प्रदातव्या मृतशय्या यथोदिता ॥ पातालमात्स्ययोः ॥ मृतकान्ते द्वितीये ह्नि शय्यां रम्यां सलक्ष
णां ॥ कांचनं पुरुषं तद्वत्फलवस्त्रसमन्वितं ॥ संपूज्य द्विजदंपत्ती नानाभरणभूषितं ॥ उपवेश्य तु शय्यायां मधुपर्कं
ततो वदेत् ॥ प्रेषोसंगे तु कुर्वंति देयाचकेपि लाशफ्रभेति ॥ शय्यादानफलं भविष्ये ॥ ॥ स्वर्गे पुरंदरपुरे सूर्यपुत्रा
लये तथा ॥ सुखे वसति वै जंतुः शय्यादानप्रभावतः ॥ पीडयंति न तं याम्याः पुरुषा भीषणाननाः ॥ न घर्मेण न शीतेन बाध्य
ते स नरः क्वचित् ॥ अपि पापविनिर्मुक्तः सर्वलोके स गच्छति ॥ विमानवरमारूढः सेव्यमानोप्सरोगणैः ॥ आभूतसं[illegible]स
वं यावत्तिष्ठत्यातंकवर्जित इति ॥ ॥ अथ प्रयोगः ॥ तंडुलादिचूर्णनिर्मितेष्टदले तिलप्रस्थं निधाय तस्मिन्नुपास्ती
र्णशय्यायाः ×तं× समंतान्मंगलवाक्यानि कुंभादीनि संस्थाप्य अद्येत्यादि अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्ति
पूर्वकाप्सरसेवायुतविमानारोहण ×का× पूर्वकेंद्रपुरगमनोत्तरषष्टिसहस्रवर्षं तदधिकरणकर्त्रीक उनस्त्रीसह स्व
संचरणसहितस्वर्गलोकमहितत्वतदुत्तरषष्टियोजनमंडलराज्यानंतरपरब्रह्मैक्यकामः प्रेतशय्यादानं करिष्ये इति सं राम
कल्प्य सपत्नीकं विप्रं शय्यां तदुपरि स्वर्णप्रतिमायां प्रेतं च संपूज्य शय्यां प्रदक्षिणीकृत्य नमः प्रमाण्यं दे ७०

ये इति चतुर्दिक्षु प्रणम्य तिथ्याद्युल्लिख्यामुकगोत्रस्येत्यादिकामांतं पूर्वोक्तं संकल्पवाक्यं पठित्वा ऽमुकगोत्रायामुकश
र्मणे ब्राह्मणाय सपत्नीकाय इमां शय्यां ईशानादिकोणचतुष्टये संस्थापितघृतकुंकुमगोधूमजलपूर्णपात्रमुष्टी
र्षकप्रदेशस्थापितघृतपूर्णकलशीं हंसतूलीप्रच्छिन्नां शुभगंडोपधानिकाम् ×× छादनपटीसधान्य
तांबूलादर्शकुंकुमक्षोदकर्पूरागरुचंदनदीपिकोपानच्छत्रासनचामरव्यजनभोजनजलपात्रपात्रे ॥
पंचवर्णवितानप्रेतप्रतिमायुतां अंगिरोदैवतां ममुकगोत्रामुकशर्माहं संप्रददे न मम इति शय्योपवेशितद्वि
जहस्ते कुशोदकं क्षिपेत् ॥ ततः इमं मंत्रं पठेत् ॥ यथा नकृष्णशयनं शून्यं सागरजातया ॥ शय्या तस्याप्य
शून्यास्तु तथा जन्मनि जन्मनि ॥ तस्य प्रेतस्येत्यर्थः ॥ अनंतरं हिरण्यादि दक्षिणां दत्त्वा प्रणिपत्य विप्रं विसर्ज
येत् ॥ ॥ इति प्रेतशय्यादानप्रयोगः ॥ ॥ अथ प्रसंगात्सुखशय्यादानप्रयोगो लिख्यते ॥ ॥ तंडुल
चूर्णनिर्मिताष्टदले प्रस्थसंमितान्तिलान् क्षिप्त्वा तत्र शय्यां सोपस्करां स्वास्तीर्य सुखशय्येत्यादि गणपतिस्मरणपूर्वकं
संकल्पवाक्य[illegible]सुकृतसर्वपापक्षयपूर्वकाप्सरोगणसेवायुतविमानारोहणपूर्वकेंद्रपुरगमनोत्त

श्रा० चं० रषष्टिसहस्रवर्षनदधिकरकक्रीडनस्त्रीसहस्रसंवरणसहितस्वर्गलोकमहीतलतदुत्तरषष्टियोजनमंडलराज्या
७९ नंतरपरब्रह्मैक्यकामोमुकगोत्रोमुकशर्माहंशय्यादानंकरिष्यइतिसंकल्प्यगणेशंसंपूज्यसपत्नीकंवि
प्रंवस्त्रचंदनभूषणादिनेनोपचारेणसंपूज्यततःशय्यांतदुपरिस्कवर्णप्रतिमायांलक्ष्मीनारायणं चसंपूज्य
तांप्रदक्षिणीकृत्यनमःप्रामाण्येदेव्यै इतिचतुर्दिक्षुप्रणम्यतिथ्याद्युल्लेखांतेसर्वपापक्षयेसादिकामांतंपूर्वो
क्तसंकल्पवाक्यमुक्त्वामुकगोत्रायामुकशर्मब्राह्मणायसपत्नीकायेमांशय्यामीशानादिपूर्वमंत्रः॥य
थानकृस्णशयनंशून्यंसागरजातया॥शय्याममाप्यशून्यास्तुतथाजन्मनिजन्मनि॥यस्मादशून्यंशयनंकेशव
स्यशिवस्यच॥शय्याममाप्यशून्यास्तुतथाजन्मनिजन्मनि॥इतिहिरण्यंदत्वाब्राह्मणान्भूयसींचसंकल्प
येदितिदिक्॥ ॥भारद्वाजकुलोदधौसमभवच्छ्रीबालकृष्णाभिधःसोमोलांछनवर्जितःप्रतिदिनंसंतोष
कृद्विदुषां॥तत्सूनुःप्रथमोमहामणिरिवप्रख्यातकीर्तिर्गुणैरासीच्छास्त्रवनेमृगेंद्ररचनोनाम्नामहादेव
कः॥१॥तत्पुत्रेणदिवाकरेणविदुषानिष्पादिताचंद्रिकासत्सौहृदकृतिमुनतांस्वमनसःसंप्र्य
तोहेबुधाः॥यद्यस्तित्वयमेतदीयकृतितोवाच्यःकथंनिर्णयःस्तर्हिवंनिपुणेविभाव्यहृदयेदृष्ट्वैव ७९

तोमामकं॥उक्तंनात्रमयास्वरंस्वरचितंयद्दृष्टपाराशरैः दिष्टोक्तंश्राद्धविनिश्चयेतदखिलंस्पष्टंपरंज्ञप्तये॥संदिष्टंगु
रुदत्तमंत्रकृपयाश्राद्धेकविक्रीडितंतेनश्रीरविमंडलांतरगतोनारायणःप्रीयतां॥२॥ ॥इतिश्रीभारद्वाजमहादे
२धा त्मजसकलविनिधानश्रीदिवाकरविरचितेधर्मशास्त्रसुधानिधौश्राद्धचंद्रिकासमाप्तिमफाणीत॥ ×महादेव×
२वा ॥श्री॥ ॥छ॥ ॥दिनकरतनूजेनवैजनाथेनधीमता॥श्रीश्राद्धचंद्रिकाग्रंथेरम्येतातविनिर्मिते॥१॥विषया
नुक्रमःसर्वःकथ्यतेश्लोकमालया॥मंगलाचरणंपूर्वंततःश्राद्धप्रसंसनं॥२॥श्राद्धस्यलक्षणंपश्चाच्छ्राद्धभेदाः
प्रकीर्तिताः॥भेदानांलक्षणंप्रोक्तंश्राद्धकालास्ततःपरं॥३॥निर्णयस्यश्राद्धानिचोक्तानिगजच्छायानिरूप
णं॥तत्रभोक्तुर्महादोषकथितंनरकादिकं॥४॥श्राद्धेप्रशस्तदेशाश्चनिषिद्धाअपकीर्तिताः॥श्राद्धाधि
कारिणःपश्चाद्दौहित्राद्याःस्मृताःस्मृताः॥५॥श्राद्धेयोग्यामध्यमाश्चनिषिद्धाअपिकीर्तिताः॥परीक्षणनिषेध
श्चदेवेतीर्थेचकीर्तिताः॥६॥परीक्षायाःप्रकारश्चमनुप्रोक्तोथवर्णितः॥श्राद्धग्राह्यपदार्थस्तेनिषिद्धाश्चापि
नि कीर्तितः॥७॥द्रव्याणिपितृपूजायाःपात्राण्युक्तानिभोजने॥श्राद्धभेदेनविश्वेषांदेवानांनिर्णयःकृतः॥८॥
नित्यश्राद्धादिषुतथाविश्वेदेवनिषेधनं॥पवित्रग्रहणंप्रोक्तंतेत्रत्राचानामिकाविधिः॥९॥दर्भसंख्यात्र

कथिता कालो विप्र निमंत्रणे ॥ निमंत्रणस्य कर्तारः संख्या च ब्राह्मणस्य च ॥ १० ॥ निषेधो विस्तरस्योक्त एकब्रा
ह्मणपक्षकः ॥ पाकपात्राणि पाकस्य कर्तारः कथितास्तथा ॥ ११ ॥ पितृदेवद्विजानां तु पूजाकाले विधिः स्मृतः ॥ भिक्षुका
तिथयः प्रोक्ता वस्त्रावश्यकता तथा ॥ १२ ॥ लक्षणं चाहतस्योक्तं नीली वस्त्रनिषेधनं ॥ तत्र यज्ञोपवीतस्य दानमाव
श्यकं मतं ॥ १३ ॥ साधनं मंडलस्योक्तं तं निर्माणप्रकाशनं ॥ तत्राग्नौकरणं प्रोक्तं दैविके तन्निषेधनं ॥ १४ ॥ विधुरस्य विकल्पस्तु क
थितो यमवाक्यतः ॥ परिवेषणधर्मश्च घृतपात्रनिधापनं ॥ १५ ॥ चित्राहुतिनिषेधस्तु ब्राह्मणानां प्रकीर्तितः ॥ अन्योन्यस्प
र्शभुक्तो तु प्रकारः समुदाहृतः ॥ १६ ॥ सशेषभोजनविधिः पिंडदानं ततः परं ॥ पिंडदेशादिरीत्योक्ता परिमाणं ततः परं ॥ १७ ॥
विकिरः पिंडकाले च मार्जारस्पर्शदूषणं ॥ पिंडानां प्रतिपत्तिश्च कथिता प्राशनादिका ॥ १८ ॥ सुप्रोक्षितादिकं प्रोक्तमुच्छिष्टे
क्षालनं ततः ॥ तत्कर्तारः प्रकथितास्तत्काले निरूपिताः ॥ १९ ॥ उच्छिष्टप्रतिपत्तिश्च दक्षिणादानमीरितं ॥ दक्षिणा
द्रव्यकथनं वैश्वदेवनिरूपणं ॥ २० ॥ साग्नेर्विशेषः संप्रोक्तः श्राद्धशेषस्य भोजनं ॥ केषांचित्तं निषेधस्तु सापवाद उ
दाहृतः ॥ २१ ॥ दातृभोक्त्रोस्तु नियमाः क्षौरवर्जनकादयः ॥ स्वस्याशक्तौ प्रतिनिधिः शिष्यपुत्रादिरीरितः ॥ २२ ॥ ॥ ७२

नित्यश्राद्धविधानं च क्षयाहश्राद्धमीरितं ॥ मासस्य निर्णयः सर्वो मलमासनिषेधनं ॥ २३ ॥ एकोद्दिष्टविकल्पस्तु पार्वणे
न समं ततः ॥ विशेषतस्तु केषांचिदेकोद्दिष्टं प्रदर्शितं ॥ २४ ॥ श्राद्धेषु साधवानां तु संन्यासिनामपि कीर्तिता ॥ असमर्थस्य सं
कल्पश्राद्धमुक्तं ततः परं ॥ २५ ॥ आमश्राद्धादिकालोऽथ संक्रांतौ दिननक्तयोः ॥ महालयोऽस्ततः प्रोक्तः प्रोष्ठपद्यादिकं ततः ॥
॥ २६ ॥ त्रिभागहीनपक्षाश्च कन्यास्थार्कप्रशंसना ॥ पिंडदाननिषेधश्च घस्राः प्रोक्ताः समासतः ॥ २७ ॥ सकृन्महाल
ये सर्वनिषेधादिकमित्यपि ॥ विधवाकर्तृके श्राद्धे विशेषाः पार्वणेषु च ॥ २८ ॥ भरणीश्राद्धमुदितं नवमीश्रा
द्धमेव हि ॥ मघात्रयोदशीश्राद्धं शस्त्रहतानामुपेयुषां ॥ २९ ॥ श्राद्धकालः प्रकथितो दैवयुक्तं च तद्भवेत् ॥ मा
तामहश्राद्धविधिर्दौहित्रस्य प्रकीर्तितः ॥ ३० ॥ एकोद्दिष्टं ततः प्रोक्तं त्रिविधं तत्प्रकीर्तितं ॥ मासिकश्राद्धसमय
आद्यमासिकनिर्णयः ॥ ३१ ॥ तथोनमासिकादेश्च कालाः सर्व इहोदिताः ॥ आहिताग्नेर्विशेषेण दाहाहो आ
द्यमासिकं ॥ ३२ ॥ इत्थं विस्तरशः प्रोक्तं स्वकालेऽन्तरितस्य च ॥ कालः प्रोक्तस्तथा प्रेतश्राद्धवर्जनं ॥ ३३ ॥ अथोदकुं
भश्राद्धं च सविशेषं प्रकीर्तितं ॥ आमश्राद्धं ततः प्रोक्तं तन्निमित्तानि चैव हि ॥ ३४ ॥ मासिकाद्विकेयोरामश्रा

श्रा० चं० ह्रस्वप्रतिषेधनं ॥ आमस्वरूपमुदितं परिमाणं तथैव च ॥ ३५ ॥ आमश्राद्धविधिः सर्वो हेमश्राद्धमुदाहृतं ॥ निषिद्धकालः
७३ संप्रोक्तः श्राद्धपिंडप्रदानयोः ॥ ३६ ॥ श्राद्धांगतर्पणं प्रोक्तं सविधानं ततः परं ॥ निषेधाखिलसंयुक्ततर्पणस्य प्रयोजितः ॥
॥ ३७ ॥ सापवादः क्षयाहस्याज्ञाने निर्णय ईरितः ॥ भोक्तुर्भोजयितुः श्राद्धप्रारंभादेर्हि लक्षणं ॥ ३८ ॥ सविस्तरमथ प्रो
क्तं स्वकालेन तरितस्य च ॥ अद्धिकादेरनेहास्तु रजोदोषे विनिर्णयः ॥ ३९ ॥ अन्वारूढाक्षयाहस्य निर्णयः परिकीर्तितः ॥
श्राद्धानां संनिपाते च निर्णयः संप्रदर्शितः ॥ ४० ॥ तत्र प्रसंगसंसिद्धिः कथिता दैवमैक्यतः ॥ दार्शिकाद्युभ्ययोगेषु दार्शि
कस्य युगादिषु ॥ ४१ ॥ कालाः सपिंडीकरणस्य चोक्ता व्यवस्थया साग्निनिरग्निकानां ॥ तस्मात्तु पूर्वेऽह्नि षोडशापि श्रा
चोक्तं द्धानि काले प्यपकर्ष्य ॥ ४२ ॥ सपिंडीकरणादूर्ध्वं पुनस्तेषां ह्यनुष्ठितिः ॥ पुनरप्यपकर्षस्तु ह्याद्यश्राद्धार्थमी
रितः ॥ ४३ ॥ सर्वेष्वप्युक्तकालेषु न जातं चेत्सपिंडनं ॥ तदा कालांतरं प्रोक्तं रोहिण्यार्द्रार्कवारादिकं ॥ ४४ ॥ ज्येष्ठस्यै
वाधिकारोऽत्र संविभक्तधनेष्वपि ॥ त्रिप्रकाराः क्रियाः प्रोक्तास्तासां लक्षणमीरितं ॥ ४५ ॥ आहिताग्नेः कनिष्ठस्या राम
प्यधिकार ईरितः ॥ रोगिप्रसक्तौ वान्यस्याप्यधिकारस्ततः स्मृतः ॥ ४६ ॥ संयोजने विशेषश्च स्त्रीणामपि विधिः स्मृतः ॥ ७३

श्रा० चं० भ्रातॄणामविभक्तानां विभक्तानां च निर्णयः ॥ ४७ ॥ अथाजीवत्पितुः श्राद्धेष्वधिकार इतीरितं ॥ तीर्थश्राद्धं ततः प्रोक्तं विस्त
रेण ततः स्मृतः ॥ ४८ ॥ सन्यासिभेदस्तच्छ्राद्धप्रयोगो विस्तरेण तु ॥ दरिद्रसिद्धसिद्धीनां प्रकारो विनिवेदितः ॥ ४९ ॥ श्रा
द्ध द्धप्रयोगः कथितो व… चानां ततः परं ॥ स्मृतिषु क्तप्रयोगस्तु गृह्याग्ने दार्शिकस्य हि ॥ ५० ॥ शूद्राणां श्राद्धसंकल्पः रा
य्यादानविधिस्ततः ॥ सप्रयोगः कथितस्त्वेति सर्वनिदर्शनं ॥ ५१ ॥ इत्थं दिवाकरसुतेन कनीयसा श्रीरामानुजे
न गुरुभक्तिपरायणेन ॥ श्रीतातपादरचिते सुजनप्रियेऽस्मिन् ग्रंथक्रमो विलि… खितः सवितुः प्रसादात् ॥ ५२ ॥
॥ ॥ इति श्रीदिवाकरात्मजवैजनाथविरचिता श्राद्धचंद्रिकाप्रकाशानुक्रमणिका समाप्ता ॥ ॥ श्री ॥ छ
शके १७३९ ईश्वराब्दे आषाढकृष्णपंचम्यां गुरौ तद्दिने इदं पुस्तकं समाप्तं ॥ गोडणकोपनामक रामचंद्रभट्टा
त्मजनागेश्वरेण उत्तरार्धं लिखितं ॥ पूर्वार्धं मध्ये किंचित् शेष्य इंसुपनामक कृष्णभट्टेन लिखितम् ॥ ॥ राम
इदं पुस्तकं पटवर्धनोपनामक बाळकृष्णभट्ट मुहागरकर उपाध्ये तत्सुत केशवभट्टेन संपादितं ॥ ॥ ॥ छ ॥ श्री ॥
श्रीगणेशाय नमः ॥ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ श्री ॥ ॥ श्रीकरंजेश्वर्यै नमः ॥ ॥

॥ इतिश्राद्धचंद्रिकासमाप्तिगमत् ॥